भा०द०

१

श्रीगणेशाय नमः ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितम् श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् १ दशमे दशमं लक्ष्यमाश्रिताश्रितविग्रहं २ क्रीडद्यदुकुलाम्भोधौ परानन्दमुदीर्यते धर्मग्लानिनिमित्तस्तु निरोधो दुष्टभूभुजाम् ३ प्राकृतादिष्वबुद्धेषु यो निरोधः स वर्णितः तेन प्रसंगतः सृष्टिसंहारादिनिरूपणैः ४ कृत्ता नवतिश्चाध्याया दशमे कृष्णकीर्तने आदौ चतुर्भिरध्यायैर्जन्मसाधनपावनैः भारं हर्तुं हरेर्जन्म सप्रसंगं निरूप्यते ५ गोकुले मथुरायां च द्वारवत्यां ततः क्रमात् कृष्णलीलास्त्रिधा प्रोक्तास्तत्रादौ गोकुले कथा ६ सप्तविंशत्याध्यायैश्च वृन्दावनादिषु गोकुले वसतो लीला वर्ण्यन्ते सुरसुखकराः ७ एकेन यमुनावारिशायकुरेशाकृतस्तुतिः ८ एकादशभिरध्यायैर्लीला मधुवने कृता ८

राजोवाच

श्रीगणेशाय नमः । कथितो वंशविस्तारो भवता सोमसूर्ययोः राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् १ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः २ अवतीर्य यदोर्वंशे भगवान् भूतभावनः कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात् ३ श्रीकृष्णाय वासुदेवाय नमः

शेषे द्वारवतीलीला तावन्मात्रैर्विवर्ण्यते एवं नवतिरध्याया दशमे विशदाः कृताः ९ तत्र तु प्रथमे कंसः स्वस्रसूं देवकीसुतात् श्रुत्वा भीतो वधीत्तस्याः षड्गर्भानिति वर्ण्यते १० कृष्णावतारचरितश्रवणामृतनिर्वृतः उक्तानुवादेनौत्सुक्याद्राजा पृच्छति तत्पुनः कथितो वंशविस्तार इति १ अंशेनेति प्रतीत्यभिप्रायेणोक्तम् २ ननु तानि ज्ञातानि गतः पितरौ तात व्रजमेधितार्थीत्यादिना सत्यं पुनर्विस्तरेणाद्य वदेत्याह अवतीर्येति ३ श्री श्री श्री श्री श्री ॥

कृष्ण

१

अथ पेषितदोदेशात्का स्यतां पश्चरूपिराः पयोदानमुखेनापि कृष्णं तपिपितुं सुराः ११ ६

टीम

तत्र तावत्प्रथमं भगवत्अवतारकारणमाह भूमिरित्यादिभिर्नवभिः श्लोकैः दृप्तानृपव्याजा दैत्यास्तेषामनीकशतानामयुतैर्वा भूरिभारेणाक्रान्ता १६ विभोरन्तिके उपस्थिता सती १७ १८ १९ पौरुषीं पुरुषस्य भगवतो गां वाचं मे मत्तः आशु शृणुत तेः

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ १६ गौर्भूत्वाश्रुमुखी खिन्ना क्रन्दती करुणं विभो उपस्थितान्तिके तस्मै व्यसनं स्वमवोचत १७ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः १८ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः १९ गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव माचिरं २० पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि २१ वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः २२ वासुदेवकलानन्तः सहस्रवदनः स्वराट् अग्रतो भविता देवो हरेः प्रियचिकीर्षया २३ विष्णोर्माया भगवती यया संमोहितं जगत् आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति २४ शुक उवाच इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ २५ श्रीकृष्णाय नमः ॥

माचिरं अविलंबितं तथैव विधीयतां चेति २० विज्ञापनात्पुरैव पुंसा ईश्वरेणादुरस्तापः २१ २२ २३ देवकीगर्भसंकर्षणाय यशोदामोहनादिकार्यार्थे यशोदायां संभविष्यति २४ २५ श्री श्रीकृष्णाय नमोऽस्तु ते ॥

भोजेन्द्रबंधनागारे अवतारप्रस्तावकथामाह शूरसेन इत्यादिना यावदध्यायसमाप्तिः मथुरां मथुरायां चावसन् विषयान्देशान् २६ २७ सूर्यया नवोढया प्रयाणे प्रयाणार्थं २८ रश्मीन् प्रग्रहान् २९ परिबर्हे उपस्करे ३० ३१ आभाष्य

शूरसेनो यदुपतिर्मथुरामावसन्पुरीं माथुरान्शूरसेनांश्च विषयान्बुभुजे पुरा २६ राजधानी ततः साभूत्सर्वयादवभूभुजां मथुरा भगवान्यत्र नित्यं संनिहितो हरिः २७ तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः देवक्या सूर्यया सार्द्धं प्रयाणे रथमारुहत् २८ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः २९ चतुःशतं पारिबर्हं गजानां हेममालिनां अश्वानामयुतं सार्द्धं रथानां च त्रिषट्शतं ३० दासीनां सुकुमारीणां द्वे शते समलंकृते दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ३१ शंखतूर्यमृदंगाश्च नेदुर्दुंदुभयः समं प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलं ३२ पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध ३३ इत्युक्तः स खलः पापो भोजानां कुलपांसनः भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत् ३४ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं वसुदेवो महाभाग उवाच परिसांत्वयन् ३५ ॥ ॥ ॥ ॥

दरेकः अस्येति संबोध्य हंता हनिष्यति ३२ ३३ कुलपांसनः कुलदूषकः आरब्धः उद्युक्तः कचे केशबंधे ३४ नृशंसं क्रूरं महाभाग इति अयं भावः स्वजन्मनि हर्षशोकाद्युद्वेलैरानकदुंदुभिघोषजातान्दा विभाव्य तारेण ... प्रतिकार्ता संभवतीति सांत्वयन् स्तुत्वा कृपाविषयत्वेनोपपत्तिभिः आसाममार्गे ... संबोधयन् ३५ श्री श्री श्री

श्रीराम

प्रत्यक्षवत् पदैकैन पञ्चैवैकेन गच्छति पश्चात्साजन्मैकैवदेहिकर्मगतिंगतः ३८ मूल ३ श्री

राम

उदे॥ मरणामयेन हन्तीति चेत्तथापि मरणस्यापरिहरणीयत्वे देहांतरस्यवश्यंभावित्वात्तत्रापि नमग
प्रमास्यदत्तादीनामविशेषात्तद्रूपेन पापाचरणामयुक्तमित्यमिप्रेत्याह स्मपुर्जन्म वताश्रिनादि॥
देहेनस्सहेतिविधात्रास्रष्टा देलिखितत्वादिति॥ तथापि कालाधिन्वार्थहनोतिचेत्तत्राह मघवेति॥

राम

मनस्यभाविनिमरणोविलंबमात्रापपापाचरणामुक्तमितिभावः॥२७॥ विंचत्रास्मिन्देहेयतेप
दिदेहांतरंनस्यात्तदा पुज्येतपापेन अपितमोक्षंननतुतदस्तीत्याह देहे पंचत्वमापन्न इति श्राप
न्नप्रायेकर्मवशाद्पलतुरवप्रथमंदेहांतदंप्रपपश्चात्सूर्वंवपुस्सजातिउच्यतेत्रहच्छातःपव
न्नितिवद्केनमागतोनिहितेनपदांति छन्ना मुवमपच्छन्य देहांविमततपश्चादन्येन पुवप्रदेशादुत्ता

वसुदेव उवाच श्लाघनीयगुणाः शूरैर्भवान भोजयशस्करः सकुंमगनीं हन्यादेस्त्रियमुद्वाहपर्वणि ३६ मत्युर्ज
न्मवतांवीरदेहेनसहजायते अद्यवाब्दशतांतेवामत्युर्वैप्राणिनोध्रुवः ३७ देहेपंचत्वमापन्नेदेहीकर्मानुगोऽव
शः देहांतरमनुप्राप्य प्राक्तनंत्यजतेवपुः ३८ स्वप्नेयथापश्यतिदेहमीदृशंमनोरथेनाभि
निविष्टचेतनः दृष्टश्रुताभ्यांमनसाऽनुचिंतयन् प्रपद्यतेतत्किमपिह्यपस्मृतिः ४० ॥ ॥

घपुरोनिहितेनगच्छतितद्वत् अत्र चस्वीकारपरित्यागौनात्यंतभिन्नविषयावितिस्पष्टदृष्टांतरमाह यथात्र राजन्मैकैति साति
तेयांतरमवष्टभ्यपूर्वंतरांत्यजति एवंकर्मपञ्चैवकर्मानोऽन्योजीवोपि ३९ देहविषयावेवस्वीकारपरित्यागौ दोदर्शयितुंदृ
ष्टांतांतरमाह स्वप्नइति दृष्टं राजादिदर्शनं श्रुतंइन्द्रादि श्रवणं ताभ्यामाहितसंस्कारेणमनसा तदेवानुचिंतयन् इदृशं
जीगाहतदृष्टश्रुतसदृशंराजादिरूपंकिमपिश्रुतिरूपंप्रपद्यतेदेहांतरेयतदेवाहमितिप्रपद्यते मन्यते ततश्चजाग्राहदे
हादपगतस्मृतिर्भवति जाग्रत्येवदर्शयितुंदृष्टांतांतरमाह मनोरथेनेति अत्रापिदृष्टश्रुताभ्यामित्यादिसर्वंयोज्यंतथाच
वस्पतिजतोयैकस्य विज्ञेतोर्मनुरत्वंततविस्मृतिः जन्मावीत्मतत्याद्युसः सर्वभावेतन्मूरिदविषयस्वीकृतिमाहुर्यथास्वप्नमनो
रथः स्वप्नमनोरथेचेत्येप्राक्तनंनस्मरत्प्रसाविरित्यादि तद्वदत्रापिकर्मवशाद्देहांतरंप्राप्यप्राक्तनंत्यजतीति ४० श्री

त

ननु विचित्रहेतूनां कर्मणां कृत्स्नाद्देहविशेषप्राप्तौ किंकारणमत आह यतो यत इति देहस्य पंचत्वसमये पंच मृगरोषुमतो
गुमापाराचितेषु देवेन फलानि मुखेन कर्मणा चोदितं नानाविकारात्मकं मनो यं यं देहं देवतिर्यगादिरूपं प्रति धावति धाव ३

यतो यतो धावति दैवनोदितं मनो विकारात्मकमाप पंचसु । गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ॥४१॥

सत ये यमाय आणि निवेशो न प्राप्त तत्र तत्र असौ देही जायते ननु मनसः कर्तृत्वान्न देवजायतां न त्वकर्तात्मेत्यत आह
प्रपद्यमान इति तदेवाहमिति मन्यमानस्तेन सह जायत इति ॥४१॥ श्री श्री श्री श्री श्री

ननु स तं प्रविश्यैव किमपि देहमात्रं तथा प्याप्यातिप्रियस्य राज्ञ देहस्य रक्षणाय पाकृ तपमपि कृ यत इत्येतत्राह ज्योतिरिति अदः सूर्यादि ज्योतिः उदकपुत्तेलपार्थिवे मुकुटादिषु यथा उदके मुपार्थिवेषु च प्रतिबिंबेन स्थिते समीरस्य वायोर्वेगमनुगतं कंपादियुक्तं प्रतीयते यथा एवं स्वाविद्यारचितेषु गुरुषु देहे ध्वसौ रागोभ्यानुगतः प्रविष्टोम्हतिश्च मिसि वैरी प्रापुतिश्चैपत्राद्यः आलनस्ताव देहाघच्चासात जनीतो सह तेन जायत इति तत आत्मनो म धर्मो व्यासात यथा देहधर्मोः काश्पाद यथा नतिप्रती यते एवमात्म धर्मोः प्रेमाप्य देहाद्यो ऽपि देहादि विशिष्ट सूक्षः देहपार्थिशेष भोवात अर्थो म तुपुतिका इति ४२

ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति ॥४२ तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयं ॥४३ एवं तवात्मज्ञावासाह पना पुत्रकोपमा हंतुं नार्हसि कल्याणीभिन्नां त्वं दीनवत्सले ४४ शुक उवाच एवं ससामभिर्भर्त्रा देवी भ्रातानोपि दारुणाः नम्य वर्त्तत कौरव्य पुरुषादान् अनुव्रतः ॥४५ निवर्त्तितस्य तं ज्ञात्वा विचिंत्यान वदं दुर्मतिः प्राप्तं काले प्रतिकर्तुं मिद्दंत तां त्वपद्यत ४६

एवमुक्तं सा क्रोधाय मुपसंहरन् भेदमाह तस्मादिति परत इति अभिमुह्यमानात्तत्संबंधिनस्त्व यमा दयि दता मत्र च भयमिति भेदो दर्शितः ॥ ४३ पुनः सामाह एवेति पुत्रिको पमादाह मयीवाड चेतन प्राया ४४ वो व्यमान उपरिस्प मानः स्वयं दारुणः पुनः पुरुषादान् देशान् नुसृत इति ४५ आनंकं दुर्मतिरिति प हेमहाभाग दस्यत्रो ताकिंत्रिप्रायं बोधु प्रतिकर्तुमिस्यर्थः दुईवश्य माराण्य स्थापी रोम वपद्यत ज्ञातवान् ४६

हंस

भा० पू०
५॥

ननु स्वतोऽयमेतत्र मन्यते तादृशं प्राह स्वयमेव मनुरिति ॥ ४७ तस्माद्दुक्तदोषपरिहाराय केऽपि व्याचि ननु स्वतोऽयमेतत्र मन्यते तादृशं प्राह मृतोऽहमिति प्रत्यक्षदृष्टिस्तामेतामेव तते स्याह प्रदर्शयति मत्स्येकेसाय निश्चिन्त्यापि जीवनाध्यामि तादृशं प्राह मृतोऽहमिति यतः तदेवाकिंचित्करत्वात् ४८ यदि तद्दापन्दावितश्चवत्तुङ्गी वितंतुतावदेव तदंतराय प्रयोगेवास्मि यतत्तदाना विपर्ययो वा किं न स्यात् ननु यो हस्य वस्तुता विदध्याति नचायंमियतत्तदा मनुष्याद्वा मस्य मरणाभिति विपर्ययो वाकिंन स्यात् पुनः कान्तो तत्र केसस्य तववालका कंपमस्तुः स्वात्तगाद्गमितिरिति चातुः मस्यास्ता मृप्योगश्रोइते युक्तः पुनः कान्तो तत्रानि नो मपत्स्यादिशा प्रति दैव मंत्रः तथा सति उपस्थितो मत्युरयं तावन्निवर्तते तनि वृत्तः पुनरप्यात्मा योनि रेष्वापतेचेत्तदा नापरम्यो मनो मस्य ॥ अयमर्थः स्य मत्युना उपस्थितो मत्युः

यस्त्वीदृशं मत्युपर्यन्ताः नापरस्योऽस्ति देहिनः

मत्युर्बुद्धिमत्तापा ह्यो यावद्बुद्धिवलोदयं ॥ यस्योन निवर्तेत नापरस्योऽस्ति देहिनः
४७ यदा पर्य मत्यवे पुत्रान् योजयेद्रूपमास्मिमां ॥ मृतान्मे यदि जायेरन् मत्युर्वेनाम्रियेत चेत्
४८ विपर्ययो वा किं न स्यादिति धीर्तु दुरत्ययाः उपस्थितो निवर्तेत निवृत्तः पुनरायतेत ४९ म्र
एवं हि जंतोरपि दुर्विभाव्यः शुभं पयाद्दारवियोगयोगयोरहष्टतोऽयमन्तमिदमियमन्यास्ति ॥ एवं हि जंतोरपि दुर्विभाव्यः
शरीरसंयोगवियोगहेतुः ॥ ५० एवं विमत्स्यपतं पापं यावद्दात्मनि दर्शितम् पूजया मा
मवेशोरिवेहमानपुरःसरं ॥ ५१ प्रशान्तवदना भोजो नरशेषमनिरपत्रयं ॥ मन सा
इय मानेन प्रहस्मिलिद् मब्रवीत ५२

यद्वा गति दीतु दुरत्ययेत्ये स्यात प्रपंचे उपस्थितइति ४९ प्राशानमा
वर्तते तस्य पुनरनेन मन्ये जन्मामवेदेयेति यद्वा गति दीतु दुरत्ययेत्ये स्यात प्रपंचे उपस्थितो स्वल्पहितानापि दृश्यानपरित्यज्य
ईश्वरं च पुनर्देवितमस्मितिमहकांत मारम्भमिति यतेऽस्मान् पुरुषस्यौः स्वल्पहितानापि चायकमास्तियथा एवं जंतोर्भ्याम
तापि हरस्थानमपि हतति ग्रामेगतस्या नहि मस्य प्रारब्ध इष्टमिति देहेनचिन्तिमिपायकमास्ति यथा एवं जंतोर्भ्याम तस्य विश्वमापविकल्पितमृत्संगो भोरः
माथोरपिहेतुर्दुर्विभाव्यः अचिंत्यः ५० यावद्दात्मनि दर्शनेन मशानवस्थितिनिवार्य ५१ तस्य

५

यत एव अत्र पूरिरिहीवा गाढं तथा हि निर्दिष्टं अस्यास्त्वं कारात्नेनयं नास्ति यतः येभ्य पुत्रेभ्यस्तेन भयमुच्छिं तेऽश्च मां तेनमुक्ते
अन्योन्यापदेशया सर्वं पश्य मा भवे वित्सु नुतं तेनास्याः पुत्रान्समर्पयिष्ये ५३ निर्व्यत्रेनीवृतः तद्वाक्यसारं नोपपन्नस्तद्धत
५४ प्रसूतिकाले सा हि सर्वः सर्वात्मा भगवान्नेव देवताः यस्याः सा तथा सर्वदेवता मयीति वा भगवदाज्ञया त्वा ते ५५ सत्त्वेवं पुत्र
कंसमपि तवानित्यपदेशया मा हि किं दुःसहमिति साधूनां सत्त्वं धानां पुत्रलालनं सुस्वापि वाक्यं यत्केति अत आह विदुषां

स्व

वसुदेव उवाच न ह्यस्याः ते भयं सौम्य यद्वै साह शरीरजान् पुत्रान्समर्पयिष्यामि यतस्ते भयमुत्थितं ५३
शुक उवाच सर्वं ध्यानैकवर्त्ते च केसस्त वाक्यसारवित् वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद्गृहं ५४ अथ
काल उपावृत्ते देवकी सर्वदेवता पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरं ५५ कीर्तिमन्तं प्रथमजं कंसा
यानकदुन्दुभिः अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ५६ किं दुःसहं नु साधूनां विदुषां किमपेक्षितं कि
मकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां ५७ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिं कंसस्तुष्टमना राज
न्प्रहसन्निदमब्रवीत् ५८ प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयं अष्टमाद्युवयोर्गर्भात्मृत्युर्मे विहितः
किल ५९ तथेति सुतमादाय ययावानकदुन्दुभिः नाभ्यनन्दत तद्वाक्यमसतोऽविजितात्मनः ६०

मिति भगवानेव तत्त्वं न्यौ नो दितिजानतामित्यर्थः ननु स्वयं नीते सति केसो बालं न हन्यादिति मत्वा नीतवानिति किं न स्यादिति
नेत्याह किमकार्यमिति ननु देवकी कथं पुत्रं त्यक्ते स्यात अत आह दुस्त्यजमिति चित्रे धृतआत्मा हि धैर्यं तेषाम् ६० ॥ ॥

भा०द० ६

कंसस्य शांतिर्देवकार्यान्दुग्गाज्ञानमवतीति नारदस्य प्रस्तवस्यानंतरमाहनंदाद्याइत्यादि त्रयेण ६१ उभयोर्वसुदेवनंदकुलयोः ६२ वधोद्यमं दैवकृतमिति शेषः ६४ निगडैर्युक्तं खलैः ६५ ६६ ६७ ६८ दशमे प्रथमोऽध्यायः द्वितीये कंसघाताय

नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ६१ ते सर्वे देवताप्राया उभयोरपि भारत ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ६२ एतत्कंसाय भगवान् शशंसाभ्येत्य नारदः भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं ६३ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति देवक्या गर्भसंभूतं

च३ विष्णुं च स्ववधं प्रति ६४ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे जातंजातमहन्पुत्रं तयोरजनशंकया ६५ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ६६ आत्मानमिह संजातं जानन्प्राग्विष्णुना हतं महासुरं कालनेमिं यदुभिः सव्यरुध्यत ६७ उग्रसेनं च पितरं यदुभोजांधकाधिपं स्वयं निगृह्य बुभुजे शूरसेनान्महाबलः ६८ इति श्रीभागवते महापुराणे दशमस्कंधे प्रथमोऽध्यायः श्रीशुक उवाच प्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः १ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः यदूनां कदनं चक्रे बली मागधसंश्रयः २ ते पीडिता निविविशुः कुरुपंचालकेकयान् शाल्वान्विदर्भान्निषधान्विदेहान्कोशलानपि ३ ॥

देवक्या गर्भगो हरिः बलादिभिरस्तुतः साच सांत्विते ति निरूप्यते यदुभिः सव्यरुध्यतेत्युक्तम् तमेव विरोधं प्रपंचयति त्रि
रयाद्देवकीगर्भस्यान्यत्रसंचारेण भगवतः प्रवेशं च वक्तुं प्रलंबेत्यादि सार्द्धत्रयेण महाशनोऽघासुरः ३ श्री ॥

कृष्ण ॥६॥

अनुरुंधाना अनुवर्तमानाः ४ धाम कमलात देव सप्तमो गर्भो बभूव किं तद्धामेत्यत आह यमनंतमिति हर्षशोकविवर्धनः आनंदरू
पस्याविर्भावाद्धर्षः पूर्वगर्भसाधारण्याद्दुःखाच्च शोक इति ५ ननु सा गोकुले किमित्यास्ते अत आह अन्याश्चेति न केवलमेव अन्या
अपीति विवरेषु अलक्ष्यस्थानेषु जठरे संतं नयगर्भ आकृष्यमाणैः कथं ज्ञावेदित्यत आह मामकं धामेति तद् ततः ८ किमर्थमेवं कार्यमि
त्यत आह अथेति अनंतरमेव स्वयं अंशभागेनेति अंशैः शक्तिभिर्भजते अधितिष्ठति सर्वान् भक्तानिति सेव पर्यंतानि त्वं शभागतः तेन परि

एके तमनुरुंधाना ज्ञातयः पर्युपासते हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ४ सप्तमो वैष्णवं धाम
यमनंतं प्रचक्षते गर्भो बभूव देवक्या हर्षशोकविवर्धनः ५ भगवानपि विश्वात्मा विदित्वा कंसजं भयं
यदूनां निजनाथानां योगमायां समादिशत् ६ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतं रोहिणी वसुदेव
स्य भार्यास्ते नंदगोकुले ७ अन्याश्च कंससंविग्ना विवरेषु वसंति हि देवक्या जठरे गर्भं शेषाख्यं
धाम मामकं तत्संनिकृष्य रोहिण्या उदरे संनिवेशय ८ अथाहमंशभागेन देवक्याः पुत्रतां शुभे
प्राप्स्यामि त्वं यशोदायां नंदपत्न्यां भविष्यसि ९

पूर्णेन रूपेणेत्यर्थः यद्वा अंशेन ज्ञानैश्वर्यबलादिभिर्भजयति योजयति स्वीयानिति तथा तेनेति यद्वा अंशेन ~~सम्यक्~~ पु
णेषस्वरूपेण मायया भागो भजनं हननं यस्य तेन यद्वा अंशेन मायया अंशावतारादिरूपा भागा भेदा यस्य तेन यद्वा अंशेनांशेन मत्स्यादिरूपः
भजनीयाः नंदसाक्षी स्वरूपे यस्य तेन यद्वा अंशैः ज्ञानबलादिभिर्जनमनुवर्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णेन रूपेणेति विव
क्षितं कृष्णस्तु भगवान्स्वयमिति वचनादिति तो यशोदायामिति सार्द्धचतुष्टयेन २ श्रीकृष्णायनमः ॥ ॥

सर्वान्पुत्रादीन्कामयंते येतेषां वरांऽईश्वरीं श्रेष्ठां नियन्त्रीं अर्थकानां सर्वान्कामान्वरान्प्रददातीयातां १० ११ १२ त्वदिक्रमेरा
तस्याव्यवदेशामविंध्येतीसाहि गर्भसंकर्षणादिना रामेतिच संबोधनं करिष्यंति त्वयासंकृष्टेन तेन लोकस्य मरणात्रस्तु कस्तु पाद
नात् १३ तथेति पुनरपि ओमित्यादेशं प्रतिगृह्य गां पृथ्वीं १४ विस्रंसितः विगलितः विस्तस्त इत्यर्थः इति विचुक्रुशुः नतु तद्विदु
रित्यर्थः १५ मनआविवेश मनस्याविर्बभूव जीवनामेव तेधा तु संबभ्र इत्यर्थः १६ धामभ्रीमूर्तिं १७ जगन्मंगलं जगतोमूर्ति

२३

अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं धूपोपहारबलिभिः सर्वकामवरप्रदां १० नामधेयानि कुर्वं
न्ति स्थानानि च नरा भुवि दुर्गेति भद्रकालीति विजया वैष्णवीति च ११ कुमुदा चंडिका कृष्णा माधवी कन्यकेति च
माया नारायणीशाना शारदेत्यंबिकेति च १२ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि रामेति लोकरमणाद्बलभद्रं ब
लोच्छ्रयात् १३ संदिष्टैवं भगवता तथेत्योमिति तद्वचः प्रतिगृह्य परिक्रम्य गां गता तत्तथाऽकरोत् १४ गर्भे प्र
णीते देवक्या रोहिणीं योगनिद्रया अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः १५ भगवानपि विश्वात्मा भक्ता
म नामभयंकरः आविवेशांशभागेन मन आनकदुंदुभेः १६ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः दुरासदोऽति
दुर्धर्षो भूतानां संबभूव ह १७ ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी दधार सर्वात्मकमात्मभूतं
काष्ठा यथानंदकरं मनस्तः १८ ॥

मन्मंगलं अच्युतांशं अच्युतिरहिता ये ज्ञानैश्वर्यादयो पस्य तं यद्वा अच्युतस्यांशो यादवांशाः जन्मानुग्रहार्थं परिच्छिन्नवपुरित्यर्थः स
म्यक्भृतमेवाहितं वसुदेवेनार्पितं देवी दीप्ता मानामृष्टसत्त्वेत्यर्थः सर्वात्मकं सर्वस्यात्मानं अतएवात्मभूतं स्वस्मिन्नवदावेव सं
तं मनस्तः मनसैव दधार धारणायां दृष्टांतः सानुरूपं दृष्टांतमाह यथा काष्ठा प्राची दिक् आनंदकरं चंद्रमिति १८ श्रीकृष्ण

सर्वजगन्निवासस्य श्रीहरेर्निवासभूतापि नितरां सर्वजनाह्लादकतया न रेजे किंतु स्वयमेवानंदत्वमभवत् यतः कंसस्य गृहे रुद्धा अ
न्येन दृश्यते वृन्दादिषु रुद्धा अग्निशिखेव स्वर्गादिप्रवृत्तपासती ग्रामं मानानाशरस्वती ज्ञानखले चेवचेरे रुद्धायथाऽन्येषामनुपकारिणी न राजते तं
देवी १९ प्रभया भवनं विरोचयंतीं अजितः अनेतया कुक्षिनञ्चेयस्याः तां रवविरोचमानः ध्रुवं हरिरेव यतः यस्मात् ईदृशी पूर्वं नासीत् २०
ननु सैतिसा मायायदुमायाः नेति स्वयमेवाह अयमर्थः तेजो देवकार्यप्रधानः विक्रमं नैर्विर्न्तितमादेचेप राक्रमं स्फरिष्यत्येवे स्वर्गः प्रदातर्हि

सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे भोजेन्द्रगेहेऽग्निशिखेव रुद्धा सरस्वती ज्ञानखले यथा सती
१९ तां वीक्ष्य कंसः प्रभयाऽजितान्तरां विरोचयन्तीं भवनं शुचिस्मिताम् आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पु
रेयमीदृशी २० किमद्य तस्मिन्करणीयमाशु मे यदर्थतन्त्रो न विहन्ति विक्रमम् स्त्रियाः स्वसुर्गुरुमत्या वधोऽयं यशः
श्रियं हन्त्यनुकालमायुः २१ स एष जीवन्खलु संपरेतो वर्तेत योऽत्यन्तनृशंसितेन देहे मृते तं मनुजाः शपन्ति गन्ता
तमोऽन्धं तनुमानिनो ध्रुवम् २२ इति घोरतमाद्भावात्संनिवृत्तः स्वयं प्रभुः आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबन्ध
कृत् २३ आसीनः संविशंस्तिष्ठन्भुञ्जानः पर्यटन्महीम् चिन्तयानो हृषीकेशमपश्यत्तन्मयं जगत् २४
ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः देवैः सानुचरैः साकं गीर्भिर्वृषणमैडयन् २५ श्रीशुक उ

इयमिदानीमेव मेव हन्यतामिति विचिंत्याह अर्थतंत्रोऽपि प्रभावान् स्वं विक्रमं न विहंति न नाशयति स्त्रीवधे तन्नाशः स्यादिति भावः तदेवाह
स्त्रिया इति गुरुमत्याः गुर्विण्याः २१ किंच स एष जीवन्नपि मृतः स्यात् नृशंसितेन क्रौर्येण यो वर्तेत तं जीवंतमेव मनुजाः शपंति दुष्की
र्त्तिं कुर्वंति स च देहे मृते तनुमानिनः पापिनो नरकं गच्छति अन्यथा शापप्रकारमेवाह तनुमानिनोऽस्य देहे मृते ध्रुवं अन्धं तमो गमिष्य
तीति २२ संविशन् शयानः २४ रम्याभिर्गीर्भिः वृषणं कामवर्षिणं ऐडयन् तुष्टुवुः २५ ॥ ॥

प्रतिज्ञातं सत्यं कृतमिति हृष्टाः सत्यत्वेनैव प्रथमं स्तुवन्ति सत्यव्रतमिति सत्यं व्रतं संकल्पो यस्य तं सत्यसंकल्पमित्यर्थः
सत्यपरं सत्यं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तं त्रिसत्यं त्रिष्वपि कालेषु सत्यं सृष्टेः पूर्वं प्रलयानन्तरं च स्थितिसमये च सत्ये अव्यभिचारेणा
वर्त्तमानं तदेवाह सत्यस्य योनिमिति सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशौ एवं सच्च त्यच्च सत्यं भूतपंचकं तत्स
त्यमित्याचक्षत इति श्रुतेः तस्य योनिः कारणं अनेन पूर्ववर्त्तमानता उक्ता तथा सत्ये तस्मिन्नेव निहितं अन्तर्यामितया स्थितं अ
नेन स्थितिसमयेपि सत्यत्वमुक्तम् तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं तन्नाशेऽप्यवशिष्यमाणं रूपं अनेन
प्रलयेप्यवधित्वेन सत्यत्वं दर्शितं एवं त्रिसत्यत्वमुपपादितं तथा ऋतसत्यनेत्रं ऋतं च सूनृता वाणी सत्यं च समदर्शनं तथा मा
गवताव्याख्यास्यमानत्वात् सत्यं च समदर्शनं ऋतं च सूनृता वाणी कविभिः परिकीर्तितेति तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्त्त

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः
२६ एकायनोसौ द्विफलस्त्रिमूलश्चतूरसः पंचविधः षडात्मा सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादि
वृक्षः २७

कमिति यावत् एवं सर्वप्रकारेण सत्यात्मकं त्वां जगन्नु वयं शरणं प्रपन्नाः प्राप्ताः इति २६ ननु भक्तोपि लोको ईश्वरमनुल्यास्य
कि मिति मां शरणं प्रपद्यते तेन वेत्याह त्वमेवैकः सर्वेश्वरः सर्वस्य ब्रह्मादिकारणत्वात् वयं तु त्वदेकशरणाः एव लोकादिरूपं वृक्षं तेषे
सर्वं त्वद्व्यतिरेकेण नास्तीति वृक्षत्वेन प्रपंचं वृक्षरूपकेण निरूपयन्ति एकायन इति असौ प्रपंच आदिवृक्षः वृक्षाणां इतिवदाः
समीक्ष्यमाणे वृक्षरूपः अथ स्तुतः एकायनः एकाश्रयः प्रकृतिरयनमाश्रयो यस्य सः द्विफलः सुखदुःखे फले यस्य सः धर्मार्थकाममोक्षाश्चत्वारो
रसाः यस्य सः पंचेन्द्रियाणि विधाः ज्ञानप्रकाराः यस्य सः षडूर्मयः शोकमोहौ जरामृत्यू क्षुत्पिपासे आत्मानः स्वभावा यस्य सः सप्तधातवस्त्वचो यस्य सः पंचमहा
भूतानि मनोबुद्धिरहंकार एवं अष्टौ विटपाः शाखाः विस्तारो यस्य सः नवद्वाराणि अक्षाणि छिद्राणि यस्य सः दशप्राणाः छदाः पत्राणि

[illegible] २७

स्वरूपस्य संसारवृक्षस्य सतः कार्यस्य त्वमेक एव प्रसूतिः प्रकर्षेण सूतिर्जन्म यस्मात्सः त्वं कारणमित्यर्थः त्वं संनिधानं त्वमेव संनिधीयते अस्मिन्निति लयस्थानं त्वमेवानुग्रहश्च अनुगृह्णातीति पालकः ननु ब्रह्मविष्णुरुद्रा एव कर्तारः प्रसिद्धाः कथमहमेवेति चेत्तत्राहुः त्वन्माययेति संवृतमपिहितं चेतो ज्ञानं येषां ते त्वां तु नाना पश्यन्ति ये तु विपश्चितस्ते विद्वांसस्ते तथा न पश्यन्ति २८ ननु देवकीपुत्रोऽहं कथमेवं वदथेति चेत्तत्राहुः बिभर्षीति अवबोध एव स्वरूपः आत्मा त्वमेव रूपाणि मूर्तीर्बिभर्षि धत्से न तु त्वं कस्यापि पुत्र इत्यर्थः क्षेमाय पालनाय सतां धर्मवर्तिनां सुखकारीणि खलानाममद्राणि नाशकानीति २९ एवं क्षेममेतावतो भक्तानां मोक्षार्थमपीत्याहुः त्वयीति त्वयि समाधिना आवेशितचेतसा निमित्तेन त्वत्पादपोतेन ज्ञातेनैके मुख्याः विवेकिनः

त्वमेक एवास्य सतः प्रसूतिस्त्वं संनिधानं त्वमनुग्रहश्च त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नाना न विपश्चितो ये २८ बिभर्षि रूपाण्यवबोध आत्मा क्षेमाय लोकस्य चराचरस्य सत्त्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानां २९ त्वय्यंबुजाक्षाखिलसत्त्वधाम्नि समाधिनावेशितचेतसैके त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिं ३० स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसौहृदाः भवत्पदांभोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ३१

महत्कृतेन सेव्यतया संपादितेन यद्वा इदमपि मायामयमित्यनादरे परित्यक्ते इदमेव महत्सर्वोत्कृष्टमिति मन्यमानाः कृतेन बहुमतेनेत्यर्थः भवाब्धिं तुच्छं कुर्वन्ति अनायासेनैव भजनानुसारिणी तेषां मुक्तिरित्यर्थः ३० ननु तेन पोतेन सर्वे कस्य पारंगताः तर्हि इदानीं तन्नास्तीत्यत आहुः स्वयमिति अयमर्थः हे द्युमन् स्वप्रकाश त्वत्पादपोतसामीप्यमात्रेण भवांबुधौ वत्सपदमात्रे जाते उत्तीर्णाः स्वयमेवान्येषां भीमं दुस्तरमपि भवार्णवं समुत्तीर्य भवत्पादांभोरुहरूपां नावमत्रैव निधाय भक्तिमार्गस्थापनं विधायेत्यर्थः पारं याता न तु किं यतोऽदभ्रसौहृदाः सर्वभूतेषु तेषु प्रीतिर्येषां ते अतस्तेऽन्येषां तरणाय निधायेति अथ भवत्पादपोतेन तीर्णा अत उक्तं भवान् सदनुग्रहः सतो भक्तान् ननु गृह्णातीति ३१ ३२ श्रीकृष्णाय नमः ॥

ननु विवेकिनां किं मद्भजनेन मुक्ताः स्वत एवेति तत्राहुः येन्य इति विमुक्तमानिनः विमुक्ता वयमिति मन्यमानाः त्वयि अस्तो
निरस्तो अतएवासन् यो भावः तस्मादतएवाविशुद्धबुद्धयः न विशुद्धा बुद्धिर्येषां ते तथा त्वयि अस्तभाव इति छेदः अस्तभत्तयः
वादे एव विशुद्धबुद्धयः कृच्छ्रेणारुह्य उन्नत्यसा परं पदं मोक्षसंनिहितं स्थलं ततः अनादृत पतन्ति विघ्नैरभिभूयन्ते नत्वा
श्रितो युष्मदंघ्री येस्ते ३२ त्वदीयास्तु न कदाचिदपि पतंतीत्याहुः तथा ते नेति विनायकाः विघ्नहेतवः स्तेषामनीकानि

येन्येरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधो
ऽनादृतयुष्मदंघ्रयः ३२ तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गाः त्वयि बद्धसौहृदाः त्वयाभिगु
प्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो ३३ सत्वं विशुद्धं श्रयते भवान्स्थितौ शरीरिणां श्रे
य उपायनं वपुः वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते ३४ श्रीकृष्ण

स्तोमास्तानि पांति ये तेषां मूर्द्धसु विचरंति विघ्नान् जयन्ति इत्यर्थः ३३ सत्ता स्वस्वावहानि रूपाणि धारयसीत्युक्
तं विमोर्क्षं रूपाणीति तत्केन प्रकारेण स्वस्वावहत्वमित्यपेक्षायामाहुः सत्वं विशुद्धमिति सत्त्ववपुः श्रयत इत्यन्वयः
श्रेय उपायनं कर्मफलप्रदात् कथं येन वपुषा जनस्तवार्हणं पूजां समीहते करोति कैः वेदश्च क्रिया योगश्च तपश्च समा
धिश्च तैः चतुराश्रमधर्मैरित्यर्थः वपुषोऽनाश्रयणोऽर्हणासंभवान्न कर्मफलसिद्धिस्यादिति ३४ श्रीकृष्णायनमः

त्वय्यंबुजाक्षेत्यादिश्लोकत्रयेणभगवद्भक्तानामेवमोक्षोनान्येषामित्युक्तं तत्रकर्मफलंभक्तिंविनामास्तु मोक्षस्तुज्ञानैकसाध्य
त्वोक्तिंमन्यंतिसानुशयानेप्रत्याहुः सत्वंनचेदिति हेधातः इदंसत्वंनिजंतववपुर्नभवेच्चेत्तर्हि विज्ञानंविशिष्टं अपरोक्षज्ञानंनभवेदित्यनुषं
गः कथंभूतं अज्ञानभिदापमार्जनं अज्ञानेचतत्कभिदाचतयोरपमार्जनंनिवर्त्तकं यद्वा अज्ञानंभिनत्तीति अज्ञानभित् विज्ञानंमार्जनं
आपमासमेवेति ननुजडानांबुध्यादीनांयतःप्रकाशःतत्वल्लेतिज्ञानंभवेदेव नगुणाप्रकाशैः गुणावच्छिन्नैःप्रकाशैर्भवान्सर्वसाक्षीमूर्तिः
केवलमनुमीयतेव्यपत्नेनतुसाक्षात्क्रियतइत्यर्थः अनुमानप्रकारमाहुः प्रकाशतेयस्यचयेनवागुणाः इतियस्यसंबंधीअयंबुध्यादिगुणाः

॥ सत्वंनचेद्धात्तरिदंनिजंभवेद्विज्ञानमज्ञानभिदापमार्जनं गुणप्रकाशैरनुमीयतेभवान्प्रकाशतेयस्यच
येनवागुणाः ३५ ननामरूपेगुणजन्मकर्मभिर्निरूपितव्येतवतस्यसाक्षिणः मनोवचोभ्यामनुमेयवर्त्मनोदे
वक्रियायांप्रतियंत्यथापिहि ३६ ॥

प्रकाशतेयोगुणासाक्षीत्येवं येनवाबुध्याख्येनप्रमात्राबुध्याधिष्ठात्रानिमित्तेनवाद्योगुणाः प्रकाशन्तइत्यनुमीयतइत्यर्थः
शुद्धसत्वंचवपुरभावयितुंअभ्यमानेतुरजस्तमोकरेंऽतःकरणाचित्तप्रसादेनसाक्षात्कारोभवेदितिभावः ३५ एवंतावद्भक्तानामभ्युदयपवर्गा
र्थंरूपाणिविमर्षीत्युक्तं नामान्यपिभजनीयानिकेवलेनतुज्ञातुंशक्यंत अनंतत्वादतर्क्यत्वाच्चमनोवचसोरगोचरत्वादित्याहुः ननामरू
पइति गुणाःजन्मानिचकर्माणिचतैर्निरूपितव्येनिरूपणार्हेनभवतः कुतः अनुमेयंवर्त्ममार्गोयस्यतवेति अत्रापिहेतुःतस्यसा
क्षिणइति नहिसाक्षिणस्तत्वंमनोवचोगोचरइत्यर्थः हेदेवतदुपाचोतमाने अथापिक्रियायांउपासनादिलक्षणायांत्वांप्रतियंतिद्रष्ट
सकाः साक्षात्पश्यंतिहि प्रसिद्धं ३६

तस्मान्नश्चौवमोचद्धस्त्युपसंहरति शरणावलिति अस्मानपि संहारयन् क्रियास्तु देवार्चनादिषु ३७ विशेषतः श्रीकृष्णायरभक्तिं ददति
दिशतीति दिष्ट्या मंहे तव पदः पादभूतापाः दृश्वरस्य न वद्धन्म मात्रेणापनीत एव किंच त्वत्पदैः कोमलैः पदैः सुशोभमनैर्धांगो कुशा
दिषु शंखमलचरणैः गां पृथ्वीं द्यां स्वर्गं च तव त्वयानुकंपितां ३८ न तव जन्मना भारोपनीत इत्युक्त्या ममापि किं जीववत्संसार उत्तेः नहि
नहि त्याहुनेति वत्तेरहे ईश अस्य संसारिणस्तेजन्मनः कारणं कीडां विना न तर्कयामः किंवहे अभयाश्रयत् इति न भातसंयोधनेन

श्रीयाव नेसासं स्मरस्वं प्रत्यचिन्तयन्नामानि रूपाणि च मंगलानि ते क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेता न भवाय कल्पते ३७
दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोपनीतस्तव जन्मनेशितुः दिष्ट्यांकितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकंपितां ३८
न तेऽभवस्येश भवस्य कारणं विना विनोदं वत तर्कयामहे भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि ३९
मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः त्वं पासि नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते ४०
दिष्ट्याम्ब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय नः माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ४१

नित्यमुक्तत्वपर्यः तव जन्म कारणं नास्तीति किंच कृत्यं यतो जीवात्मानमपि भवाद्यः त्वयि विषये याऽविद्या तया कृता न परमार्थः संती
ति ३९ प्रस्तुतं मार्थयंते मत्स्याश्वेति नोऽस्मान् त्रिभुवनं चान्यदा यथा पासि तथाऽधुनापि पाहीति वंदनं ते इति वदंतः सर्वे गीर्वाणाः
प्रणमंति ४० देवकीं मत्पाहुः दिष्ट्येति नोऽस्माकं भवाय साक्षात्परः पुमांस्ते कुक्षिगतः अतो भयं माभूदिति ४१ श्रीकृष्णाय

चि

दास्य रूपमतिदं सर्वं प्रत्यगात्मत्वं यथायथावत् आस्मात्वं च पित्वा एतावॆ स्यास्तत् इति मत्समानाव लिंगानौ पुरोगाय प्रस्तुतः कृत्वा यपुरति ४२ दशमे द्वितीयोऽध्यायः तृतीयेति जन्मकृष्णस्य सम्भृतस्तुतिरिश्वयं पितृभ्यां संस्तुतो नीतः पित्रा नीतेन गोकुले १ अथेति मेगलोर्थ यर्हि सर्वगुणोपेतः कालो वभूव तदा देवक्यां विष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः परमशोभनत्वमेवा ह यर्हि त्यादिना अजनात् नारायणाज्जन्म यस्य प्रजापतेस्तस्यर्क्षं रोहिणी नक्षत्रं यर्ह्यभूत् शांतानि रक्षांश्वन्याश्विन्यादीनि ग्रहाश्च

शुक उवाच इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवम् ४१ इति श्री भागवते महापुराणे दशमस्कंधे गर्भगत विष्णोर्ब्रह्मादिकृत स्तुतिर्नाम द्वितीयोऽध्यायः शुक उवाच अ थ सर्वगुणोपेतः कालः परमशोभनः यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकं १ दिशः प्रसेदुर्गगनं निर्मलोडु गणोदयं मही मंगलभूयिष्ठपुरग्रामव्रजाकराः २ नद्यः प्रसन्नसलिला ह्रदाजलरुहश्रियः द्विजालि कुलसन्नादस्तवका वनराजयः ३ ववौ वायुः सुखस्पर्शः पुण्यगंधवहः शुचिः अग्नयश्च द्विजातीनां शां तास्तत्र समिंधत ४ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहां जायमानेऽजने तस्मिन्नेदुर्दुंदुभयो दिवि ५ जगुः किन्नरगंधर्वास्तुष्टुवुः सिद्धचारणाः विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा ६ मुमुचुर्मुनयो दे वाः सुमनांसि मुदान्विताः मंदं मंदं जलधरा जगर्जुरनुसागरं ७

तारकाश्च यस्मिन्स्तत् यर्हीति सर्वत्रानुषज्यते १ निर्मलानामुडुगणानामुदयो यस्मिन् तत्तथा मंगलभूयिष्ठाः पुरादयो य स्यां मही सा २ जलरुहैः श्रीः शोभा येषां ते द्विजालिकुलानां सन्नादो येषु ते स्तवका यासु ताः ३ समिंधत अ ग्नयोऽत्र पुरुषव्यत्ययः स मिंधते ति सम्यग्दीप्ता वभूवुरित्यर्थः ४ असुरद्रुहां कंसादिभ्यस्तिरस्कृतानां सर्वप्राणिनां देवानां चेति अजने जायमाने तदा प्रसन्नाः प्रसवो यस्मिन्दृते तस्मिन्समये ५ ६ ७

तमसा उद्भूते वनतमसि निशीथे ७ यथा यथावत् ऐश्वरीयरूपेण ८ तमद्भुतं बालकं वसुदेव ऐक्षतेति द्वितीये श्लोकेनान्वयः अद्भुतत्वे हेतुः गम्भीराणि विस्तीर्णानि अम्बुजे इव ईक्षणानि यस्येत्यादिति श्रीवत्सलक्ष्मा शोभा गलेन शोभते गलशोभी कौस्तुभो यस्मिन् ९ परिष्वक्ताः सहस्रं कुन्तलाः किरीटकुण्डलयोस्त्विषा स्फुरत्परिमितत्व इत्यर्थः १० विस्मयेनोत्फुल्ले विलोचने यस्य सः गवामयुतं मनसा दत्तवान् कंसनिरुद्धत्वात्तस्य दानस्य मनसा तत्स्पृष्टो हेतुः कृष्णावतारेति मुदाऽप्लु

निशीथे तमउद्भूते जायमाने जनार्दने । देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ८ तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधं श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौभगं ९ महार्हवैदूर्यकिरीटकुण्डलत्विषापरिष्वक्तसहस्रकुन्तलं उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत १० स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुन्दुभिस्तदा कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदाप्लुतो द्विजेभ्योऽयुतमाप्लुतो गवां ११ अथैनमस्तौदवधार्य पूरुषं परं नताङ्गः कृतधीः कृताञ्जलिः स्वरोचिषा भारत सूतिकागृहं विरोचयन्तं गतभीः प्रभाववित् १२ वसुदेव उवाच विदितोऽसि भवान्साक्षात्पुरुषः प्रकृतेः परः केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् १३

प्लुतो व्याप्तः स्नात इति वा ११ कृतधीः स्थिरबुद्धिः १२ प्रथमं पुरुषं ध्यापयन् तं परित्यज्याह विदितोऽसीति कथं विदितोऽसि भवान् प्रकृतेः परः पुरुष इति ननु किमाश्चर्यं पुरुषप्रकृतेरन्यत्वादेवेति अत आह प्रत्यक्षेण इत्यर्थः न त्वहं सन्निकृष्टं प्रत्यक्षेण उपलभ्यते किञ्चिन्न मित्यत आह केवलेति केवलश्चासावनुभवश्च आनन्दश्च स एव स्वरूपं यस्य सः किं च सर्वबुद्धिदृक् नेद्रियैर्भवतो दृश्यो भवतीत्यर्थः १३ कृष्ण

श्री

श्रीगणेश

ननु देवकीजठरे प्रविष्टस्य कि मिति भयमिति स्तुतिः क्रियते अत आह स एवेति स एव उक्तस्वरूपस्त्वं देवकीजठरे प्रविष्ट इत्यर्थः ननु विश्वं सृष्ट्वा तदनुप्रविष्टस्य किमेतदुच्यते अत आह स्वप्रकृत्येति स्वमायया सृष्ट्वा तदनु त्वमप्रविष्टः प्रविष्ट इवेति ननु तर्हि कथं जातत्वोच्यते तत्सृष्टात्तदेहे प्रविष्टत्वाद्वा न प्रविष्टादिति अत आह प्रविष्ट इवेति भाव्यसे निरूप्यसे प्रत्यक्षोवासुदेवश्चा प्रविष्ट इव लक्ष्यसे १४ अत्र दृष्टान्तः यथेति इमेऽविकृता भावा महदादयो यथा तत्त्वेति दृष्टो

सत्वं

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकं तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे १४ यथेमेऽविकृता भावास्तथा ते विकृतैः सह नानावीर्याः पृथग्भूता विराजं जनयन्ति हि १५ सन्निपत्य समुत्पाद्य दृश्यन्तेऽनुगता इव प्रागेव विद्यमानत्वान्न तेषामिह संभवः १६ श्रीकृष्णाय नमः

ते विकृता इति ते विकृतैः षोडशभिर्विकारैः सह सन्निपत्य विराजं ब्रह्माण्डं जनयन्ति सन्निपतने हेतुः पृथग्भूताः सन्तो नानावीर्या विशिष्टकार्यसमर्था न भवन्ति १५ अत एव सन्निपत्येति अतः समुत्पाद्यानुगताः प्रविष्टा इव दृश्यन्ते न पुनः प्रविष्टाः कुतः उत्पत्तेः प्रागेव कारणात्मना विद्यमानत्वात्तेषामिह सृष्टे कार्ये पश्चात्संभवः प्रवेश इति १६

भा०द०

१२

पु

शंकांततिके उत्तिदिशति एवं मयानिति नन्वेव महम अच्युत स्वरूपस्य कारणतया कार्येषु वर्त्तिर्हितेष्विंद्रियैर्ग्रह्य
मारो बुममग्रहणं किं नास्ति तत्राह बुध्यानुमेयलक्ष्योरिति बुध्यादिरूपादि ज्ञानेनानुमेयलक्ष्यं स्वरूपं येषां
तेर्गुणैरिंद्रियैर्ग्राह्यैर्गुणैः सहत्वेपि वर्त्तमानो पित्तद्ग्राह्यः तेर्गुणैः सह नगृह्यते अयंभावः नहिगुणैः सहभाव
मात्रेणग्रहणकारणं किं तु इंद्रिययोग्यता शक्तिः साच कार्यैक समधिगम्यायथाकार्यमेव कल्प्यते अतो यथाच क्षुषा रूप्य
गंधरसादिग्रहणं नास्ति तथैवाविषयग्रहणेत्वंद्रियासामर्थ्यात् अविषयत्वेन च मद्ग्रहणं नाहत्वमनुमेये सर्वबुद्ध्यादि

एवंभवान्बुध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः अनाव
तत्वाद्बहिरंतरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः १७ श्रीकृष्ण

अत्र एवं तावत् प्रागेव विद्यमानत्वात् प्रवेशो नास्तीत्युक्तं किंच परिच्छिन्नस्यैव घटादेरिव प्रवेशो भवेत्
तव त्वनावृतत्वात् परिच्छिन्नत्वे बहिरंतरभेदो नास्ति कुतः प्रवेशः तस्मात् अनावृतत्वादिति अनावृतत्वे हेतु
नाह सर्वस्येति नहि सर्वस्वरूपस्य अन्यदावरकमस्ति सर्वात्मनः न हि केनाप्यतोऽन्यस्यात्मा भवेत् आत्मवस्तुन इति
आत्मन एव वस्तुन एवेति हेतुद्वयं अतः सात्विकं आगमेन्द्रस्य स्मात् अनात्मीयात्मनाहि व्याकरणास्यावरणं घ
टते तथाव स्तुनः परमार्थस्यावस्तुनावरणं न घटते इत्यर्थः तस्मात्सर्वांतर्यामित्वेन प्रवेशेन मुख्योऽस्ति कुतस्त
द्गर्भे प्रवेशः अतः केवलानुभवानंदस्वरूप एव विद्योऽसीत्याशयं मम भागणामि त्वमर्थः १७ श्रीकृष्णायनमः

के०म

१२

नन्वेवं त्रैगुण्यं प्रपंचस्यावस्तुत्वे घटेत तत्तु न संभवति सत्यत्वेन प्रतीतेरित्याशंक्याह यच्चेति आत्मनो दृश्येषु गुणेषु देहा
दिषु स्वव्यतिरेकतः आत्मव्यतिरेकेण एषु केषु सन्नयं देहादिरिति व्यवसीयते निश्चीयते पुमान्भिः अबुधैः अविवेकिभिः व्यतिरेक
दर्शनात् किं च मनीषितं विचारितं तत्तु देहादि सर्वं यतः विनानुवादं वाचारंभणमात्रं विना सम्यक् न भवति अतो वस्तुत्वेन त्यक्तं बाधि
तमेव वस्तु बुध्या उपाददत्स्वीकुर्वन्न तेन युक्तः इत्यर्थः १८ एवं परमेश्वरस्य प्रपंचस्य तद्व्यतिरेकेणासत्त्वमुक्त्वा परमेश्वरो पादान
त्वादपि तद्व्यतिरेकेणासत्त्वमित्याह त्वत्तोस्येति न चैवं सत्यपि विकारित्वमित्याह अनीहादिति अगुणत्वादनीहत्वं ततोऽविका

यच्चात्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधैः विनानुवादं न च तन्म
नीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान् १८ त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदन्त्य
नीहादगुणादविक्रियात् त्वयीश्वरे ब्रह्मणि नो विरुध्यते तदाश्रयत्वादुपचर्यते गुणैः
१९ स त्वं त्रिलोकस्थितये स्वमायया विभर्षि शुक्लं खलु वर्णमात्मनः सर्गाय रक्तं रज
सोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये २० त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवती
र्णोसि ममाखिलेश्वर राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे चमूः २१

रित्वमित्यर्थः नन्वनीहत्वे कर्तृत्वं कुतोऽविकारित्वे तत्राह त्वयीश्वर इति चेतनत्वादविकारित्वं ईश्वरत्वात्कर्तृत्वमि
ति नन्वेतदपि विरुद्धमेवेत्याह तदाश्रयत्वादिति गुणोः कुर्वद्भिः त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते गुणानामाश्रयत्वात् यथामात्य
कृते राजनीति १९ एवं भूतस्यैव तवमायया विश्वस्थितिसर्गलयार्थं त्रिवर्णा गुणावताराः एवमयं भूभारापनयनार्थमि
त्तिहीतमित्याह स त्वमिति भ्रमोक्षयेन २० रिरक्षिषुः रक्षितुमिच्छुरवतीर्णोसि शुक्लेन वर्णेन अतः साधूनां रक्षार्थं राज
न्यसंज्ञोऽसुरकोटियूथपास्तैर्निर्व्यूह्यमाना इतस्ततश्चाल्यमाना या चमूः सेनाः निहनिष्यसे संहरिष्यसि २१ कृष्ण

किंतु यथाहं मत्तस्त्वया भयमित्याह अयं त्विति असभ्यः खलः समर्पितं कथितं अभिसरति आगमिष्यति २२
उपाधावत् अस्तौत् २३ त्वयि मय्यपि भयं नैव तावन्नास्तीति श्लोकचतुष्टयेनाह देवकी किंचिद्वितायाह रूपमिति यत्तल्लोकप्रसि
वेदेषु रूपं वस्तु प्राहुर्वेदाः किं तत् तदाह अव्यक्तं अप्रत्यक्षं तर्हि किं आद्यं कारणं तर्हि किं परमाणवः नेत्याह ब्रह्म बृहत् तर्हि किं प्रधानं नेत्याह ज्योतिः चै
तन्यं तर्हि किं शैवपाशुपताभिमतज्ञानगुणवान् निर्गुणं किं मीमांसकानामिव ज्ञानपरिणामि न निर्विकारं किं पुच्छवादादीनामिव शा
क्तिविक्षेपरापरिणामि नेत्यसत्तामात्रं तर्हि किं सामान्यं न निर्विशेषं तर्हि किं कारणत्वात्सक्रियं न निरीहं स त्विविष्णुगो ते

अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर स तेऽवतारं पुरुषैः
समर्पितं श्रुत्वाधुनैवाभिसरत्युदायुधः २२ शुक उवाच अथैनमात्मजं वीक्ष्य महापुरु
षलक्षणं देवकी तमुपाधावत्कंसाद्भीता शुचिस्मिता २३ देवक्युवाच रूपं यत्तत्प्रा
हुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारं सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णु
रध्यात्मदीपः २४

राकारत्वं एवंभूतं किमपि कथं कल्प्यं यत्तत्स एव साक्षात्त्वं विष्णुरिति अपरोक्षत्वेनाह अध्यात्मदीप इति
बुद्ध्यादिकारणानां संघातस्य प्रकाशकः अथ वा अव्यक्तं नेत्यादिप्रकारेणाव्यक्तमित्युक्तं कथं तावत्तत्र व्यक्तं तर्हि
त्याह आद्यं सर्वस्य कार्यस्य आद्यं अनादिरूपः तथापि न जातं निर्गुणं न निर्विकारमिति चतुर्भिः पदैः देशेन प्रवृत्त्यो
न च विकारत्वाच्च क्रियां करोतीति तज्ज्ञाः सत्तामात्रमिति एवंभूतेन निर्विशेषमिति सामान्येन निरीहमिति क्रियया च प्र
क्रियां न करोति अन्यसमानेऽप्येवंभूते स्तवनं
मयं नास्तीति भावः २४

किंच महाप्रलयेप्यवशिष्यमाणस्य कुतो भयमित्याह नष्टे लोक इति चराचरे लोके महाभूतेषु लीने आद्यादिभूतं गतेषु सत्सु अंशवि
शेषु तस्मिन्नपि व्यक्ते अव्यक्ते प्रधानमात्रे अवशिष्यमाणे प्रधाने संहृतप्रायस्य स्वमयि लीनमिदं शक्तिपुञ्जादेव मुख्यो ध्वनीय
मिति सं अशेषसंज्ञ इतिवा २५ किंच एवं प्रलयहेतुर्योयं कालः एतं हे अव्यक्तबंधो प्रकृतिप्रवर्तक स्य प्रलयापि भूत
तस्य तेतव चेष्टां लीलां चेष्टते तिष्ठतीति निमेषादिर्वत्सरान्तः पुनः पुनर्वत्सरावर्त्तमानो महीयान द्विपरार्द्धरूपः यस्य चेष्टामाहुः तं त्वां क्षेमधाम

नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शि
ष्यतेऽशेषसंज्ञः २५ योयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वं निमेषादिर्वत्सरान्तो
महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये २६ मर्त्यो मृत्युव्यालभीतः पलायन् लोकान्सर्वान्निर्भयं नाध्य
गच्छत् त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति २७ स त्वं घोरादुग्रसेनात्मजान्नस्त्रा
हि त्रस्तान्भृत्यवित्रासहासि रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्ठाः २८ जन्म
ते मय्यसौ पापो मा विद्यान्मधुसूदन समुद्विजे भवद्धेतोः कंसादहमधीरधीः २९ उपसंहर विश्वा
त्मन्नदो रूपमलौकिकं शंखचक्रगदापद्मश्रिया जुष्टं चतुर्भुजं ३०

अभयस्थानं प्रपद्ये शरणं व्रजे २६ क्षेमधामत्वमेवाह मर्त्य इति लोकानति यदृच्छया केनापि भाग्योदयेन हे आद्य २७
प्रसन्नं त्वं विद्रापयति सत्वमिति भृत्यानां वित्रासं हंतीति भृत्यवित्रासहा ध्येयं पौरुषं परं ऐश्वरं ध्याननिष्ठं ध्यानास्पदं मांसदृशां
मा च दृश्यं प्रत्यक्षमाकृषीष्ठाः २८ भवत एव हेतोर्निमित्तान्मत्तो त्वत्सात् समुद्विजे बिभेमि यतो अधीरचित्ता ३० कल्पायनम:

किमित्युपसंहर्तव्यं रूपं स्रष्टेन मया पुत्रेण तव महती श्लाघा स्यादिति तत्राह विश्वमिति निशान्ते प्रलयावसाने यथावकाशं यथावकाशमसंकोचितः असंभावितत्वादपहास्यमेव स्यादित्यर्थः ३१ चतुर्भुजरूपेणाविर्भावकारणं गानदाह त्वमेवेत्यादिचतुर्दशभिः पूर्वसर्गे प्रथमजन्मनि अभूः आसीः पृश्निर्नाम स्वायंभुवमन्वन्तरे तदायं वसुदेवः ३२ तेपाथे तपः कृतवंतौ ३३

विश्वं यदेतत्स्वतनौ निशान्ते यथावकाशं पुरुषः परो भवान् बिभर्ति सोयं मम गर्भगोऽभूदहो नृलोकस्य विडंबनं हि तत् ३१ श्रीभगवानुवाच त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति तदायं सुतपा नाम प्रजापतिरकल्मषः ३२ युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः संनियम्येन्द्रियग्रामं तेपाथे परमं तपः ३३ वर्षवातातपहिमघर्मकालगुणाननु सहमानौ श्वासरोधविनिर्धूतमनोमलौ ३४ शीर्णपर्णानिलाहाराबुपशान्तेन चेतसा मत्तः कामानभीप्सन्तौ मदाराधनमीहतुः ३५ एवं वां तप्यतोस्तीव्रं तपः परमदुष्करं दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ३६ तदा वां परितुष्टोहममुना वपुषानघे तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ३७ प्रादुरासं वरदराड् युवयोः कामदित्सया व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ३८ अजुष्टग्राम्यविषयावनपत्यौ च दंपती न वव्राथेऽपवर्गं मे मोहितौ देवमायया ३९

३४ ३५ तप्यतोः आचरतोः युगानि मदात्मनोः मच्चित्तयोः ३६ अमुना वपुषा ३७ प्रादुर्भूतोऽस्मि वरदराट् वरदेषु श्रेष्ठ इत्यर्थः तेन च सकृद्दर्शनाद्यवतारं वारं मा विभावेच्छारया मुक्तं मादृशः मया सदृशः कामस्य दित्सया दातुमिच्छया ३८ मे मत्तो युवां अपवर्गं न प्राप्तवंतौ ३९ कृष्ण
य

वरं वृत्वा प्रजायते ४० ४१ अदितिः कश्यपाद् [illegible] अस्वेति [illegible] तदर्पितं रूपं यौ वचोरहस्यमेव पुनरास्मि तथ्यः
४२ ४३ प्राक्प्रपन्नं तावता देत रूपमेजन्मेति स्मरणाय तव दर्शितं ममैवं महिष्ये अनंतरं त्वं दिवचा वासोपि
भविष्यामीति भाव. ४४ ननु तव विप्रस्तन्मोपि जन्म प्रसाद यो : पुनर्जन्मोस्तु तः परं न भविष्यती स्पात् पुत्राविति ४५ ४६

गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतं ग्राम्यान् भोगानभुंजीयां युवां प्राप्तमनोरथौ ४० अदृष्ट्वा
अन्यतमं लोके शीलौदार्यगुणैः समं अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ४१ तयोर्वां पुनरेवाहम
दित्यामास कश्यपात् ॥ उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ४२ तृतीयेस्मिन् भवेऽहं वै तेनैव वपु
षाथ वां जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ४३ एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे
नान्यथा मद्भवं ज्ञानं मर्त्यलिंगेन जायते ४४ युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् चिं
तयंतौ कृतस्नेहौ यास्येथे मद्गतिं परां ॥ ४५ श्रीशुक उवाच इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्म
मायया पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ४६ ततश्च शौरिर्भगवत्प्रचोदितः
सुतं समादाय स सूतिकागृहात् यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाजनि नंदजायया ४७

यदि कंसाद्बिभेषि तर्हि मां गोकुलं नय यशोदाया सुतां कन्यां अत्रायामानयेति प्रथमश्लो
के भगवता प्रचोदितो वसुदेवो यदा गंतुमैच्छत्तदैवाजा [illegible] योगमाया सा नंदजायया
निमित्तभूतया अजनि जाता ४७

हृतः प्रत्ययार्थः सर्ववृत्तयो चेष्टा येषां प्राप्यवाहृतः प्रसुप्ताः अन्नमाश्च सर्ववृत्तयो चेष्टा जायता मपितथाभूतेषु द्वारपालेषु सत्सु बृहत्कपाटेषु लोहकीलकयुक्तं शृंखलैः बृहद्भिः कपाटादिभिः दुरत्यया रतिया पुंटस्व स्व एव अवर्ण्यत विवृता इत्यर्थः आश्रिपंतीति वर्तमाने रुराद्देहस्य स्वैर्निमितात ४९ गंभीरोपस्तो यौघस्तस्य जवेन पंडुमेयस्तेः फेनिला फेनयाश्च भयानकै रावर्तशतै र्व्याकुलाः श्रियः पतेः सीतापतेः ५० प्रतिकुर्व

तयाहृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ४८ ताः कृष्णवाहे वसुदेव आगते स्वयं व्यवर्यन्त यथा तमो रवेः ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगाद्वारि निवारयन् फणैः ४९ मघोनि वर्षत्यसकृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला भयानकावर्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रियः पतेः ५० नंदव्रजं शौरिरुपेत्य तत्र तान् गोपान् प्रसुप्तानुपलभ्य निद्रया सुतं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहानगात् ५१ देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकां प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ५२ यशोदा नंदपत्नी च जातं परमबुध्यत न तल्लिंगं परिश्रांता निद्रयापगतस्मृतिः ५३ इति श्रीभागवते महापुराणे दशमस्कंधे कृष्णजन्मनि तृतीयोऽध्यायः ३ श्रीशुक उवाच बहिरंतःपुरद्वारः सर्वाः पूर्ववदावृताः ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः १ ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते ॥ २

बध्वा पदोः पादयोः लोहं निगडं आस्ते स्म ५२ जातं किंचिदिति केवलं अबुध्यत न तु पुत्रः कन्या चेति यतो निद्रयापहृतेति ५३ इति दशमे तृतीयः चतुर्थे चंडिकाकन्याकर्षणाति भयाकुलः दुर्मतिर्हितमनेकं सोऽजान्वादिशत् १ तदहस्तु मंत्रज्ञ २ ६ ६ ६ ६ ६ ६ ६ ६ ६ ६ ६

कालेऽमृत्युः २ ४ ५ अंगदे आतः ६ दीनदीनवत् दीनादपि दीनवत् न तु तथा ७ अस्याऽन्यत्र नीतत्वात् चोसौ योगमायेति ज्ञातत्वात् याचितोऽपि आच्छिच्छिदे आकृष्य जग्राह ७ अपोथयत् बलेन चिक्षेप ८ सद्यस्तद्देवकीमूर्त्त्वा ९ १०

सतल्पात्तूर्णमुत्थाय कालोऽयमिति विह्वलः सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्द्धजः ३ तमाह भ्रातरं देवी कृपणा करुणं सती स्नुषेयं तव कल्याण स्त्रियं मा हन्तुमर्हसि ४ बहवो हिंसिता भ्रातः शिशवः पावकोपमाः त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयतां ५ नन्वहं ते ह्यवरजा दीना हतसुता प्रभो दातुमर्हसि मन्दायाः अंगेमां चरमां प्रजां ६ श्रीशुक उवाच उपगुह्यात्मजामेवं रुदत्या दीनदीनवत् याचितस्तां विनिर्भर्त्स्य हस्तादाच्छिच्छिदे खलः ७ तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुतां अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ८ सा तद्धस्तात्समुत्पत्य सद्यो देव्यम्बरं गता अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ९ दिव्यस्रगम्बरालेपरत्नाभरणभूषिता धनुःशूलेषुचर्मासिशंखचक्रगदाधरा १० सिद्धचारणगन्धर्वैरप्सरःकिन्नरोरगैः उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ११ किं मया हतया मन्द जातः खलु तवान्तकृत् यत्र क्व वा पूर्वशत्रुर्मा हिंसीः कृपणान्वृथा १२ इति प्रभाष्य तं देवी माया भगवती भुवि बहुनामनिकेतेषु बहुनामा बभूव ह १३ तयाभिहितमाकर्ण्य कंसः परमविस्मितः देवकीं वसुदेवं च विमुच्य प्रश्रितोऽब्रवीत् १४ अहो भगिन्यहो भाम मया वां बत पाप्मना पुरुषाद इवापत्यं बहवो हिंसिताः सुताः १५

श्री

पु ४

कंस उवाच

पत्र कृपणानिति अन्यान् शिशून् हननिष्यतीति तन्न्यावारयति पाठान्ते मामं कृपणान् हिंसि त्वतत्व नसीति १२ बहुनामनिकेतेषु वाराणस्यादिस्थानेषु १३ परमविस्मितः कथं देवी वागन्तता जातेति १४ हे भाम हे भगिनी भर्तः पुरुषादो राक्षसो यथा स्वापत्यमेव हिनस्ति तद्वत् १५

तेषां महाभागो स्वकृतं भुंक्ते स्वरभ्यक्तकर्मणो जातो नेत्रं च प्राप्नोति सदा नासत्ते किंतु अल्पकालमेव अनेन तदापि एकत्र नासते
किंतु विपुरुषे तेषु यतो दैवाधीनाः १८ सदा नासत्त इत्यनेन यदुक्तं जन्मस्मरणादित्त इति देहिनामेव नाशेन इत्याह भूतानीति भू
तानि देहास्त्वयांति अपयांति च भवंति न भवंति चेत्यर्थः यथाम्भसि सौमानि पदानीति न तद्वत् एतेषु भूतेषु जन्मादिभिर्विक्रि
यमाणेषु अयमपरो हस्तयानस्थ [illegible] विपर्ययेन प्राप्नोति एकरूप एव वर्त्तत इत्यर्थः भोगेषु

सत्त्वं रजस्तम कृतरागपस्य कृतानि स्वं [illegible] लोकांल्लोकात्वे गमिष्यामि प्रलोके च मतः स्वसन् १६
दैवमन्यन्ते वर्हि लग्न [illegible] पितृसुर्निहतवाल्लिवालकं १७ मा शोचतं
महाभागा आत्मजान्स्वकृतं भुंजः स्वकर्मसदेहकर्मदैवाधीनाः सदा नासते १८ भूविमोमानि भूतानि
यथायांत्यपयांति च नायमात्मा [illegible] विषये [illegible] १९ यथा मेधं विदोष भेदो यतं
आत्मविपर्ययः देहयोगवियोगौ च संसृतिर्न निवर्तते २० ॥ ॥ ॥ ॥

विक्रियमानेषु यथा भूतस्तथैवेति १९ एवं विचार्य मातो संक्लिनष्टो का यचकाः अज्ञानतस्तु न निवर्त्तत इत्याह यथे
ति यथा प्रथावत् अनेके विदः एव सज्ञानतः आत्मविपर्ययः देहात्मबुद्धिर्भवति देहाहंकारेण आत्मनि परिच्छिन्ने सत्तीदं
कोरास्पदं भिन्ने भवति यतो भेदात् पुत्रादि देहे योगो वियोगश्च ततः संसृतिः सुखदुःखेभूतिया वदज्ञानेन निवर्तत इत्यर्थः २०

एवमन्यप्रकारेणापि नैते तव तनयाः अहं तु तान् घातितवान् तथापि त्वं तान् दृष्ट्वा स्वतनयान्मया व्यापादितानपि मानुशोचेति सोऽन्व
यति तस्मादिति अज्ञानात्मन्येवकर्मबाध्यमानयत इति २१ कथं तर्हि पिता लोकादिहन्तुस्तत्रस्य यत्र प्राय अभिनिवेशः अतो नमले
मैवेत्याह यावदिति अस्वदृक् देहाभिमानी तदभिमानीति तस्य देहस्य हन्तेतमात्मेति अभिमन्यमान इत्यर्थः २२ श्यालः कंसः स्व
स्रोरिति स्वसृ शब्देन द्विवचनान्तेन पदस्यामिथुनत्वस्यायाभिधानिलक्षणायाः स्वसृत्वात्पिण्डाभिधाने लिंग समवायेन साक्षान्नान्तरात्

तस्माद्भद्रे स्वतनया व्यापादितानपि मानुशोच यतः सर्वः स्वकृतं विंदतेऽवशः २१ यावद्धतोऽस्मि हंतास्मी
त्यात्मानं मन्यतेऽस्वदृक् तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् २२ क्षमध्वं मम दौरात्म्यं साधवो दीन
वत्सलाः इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् २३ मोचयामास निगडाद्विश्रब्धः कन्यकागि
रा देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं २४ भ्रातुः समनुतप्तस्य क्षांतरोषा च देवकी व्यसृजत् वसुदेव
श्च प्रहस्य तमुवाच ह २५ एवमेतन्महाभाग यथा वदसि देहिनां अज्ञानप्रभवाहंधीः स्वपरेति भिदा य
तः २६ शोकहर्षभयद्वेषलोभमोहमदा[illegible]न्विताः मिथो घ्नंतं न पश्यंति भावैर्भावं पृथग्दृशः २७
कंस उवाच कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः देवकीवसुदेवाभ्यामनुज्ञातोऽविशद्गृहं २८ तस्यां
रात्र्यां व्यतीतायां कंस आहूय मंत्रिणः तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया २९ ॥ ॥ ॥

तौ इति वत् देवकीवसुदेवयोः प्रत्येकं पादग्रहणमित्यर्थः श्यालत्वादेव वाक्येऽपि द्विवचनाभिधानं २३ आत्मसौहृदं प्रियवा
दिना दर्शयन् २४ २५ २६ स्वपरभेददर्शनेन किं भवति तदाह शोकहर्षेति भावैर्देहादिभिर्भिन्नमित्यर्थः भावान् हंतं भाव
मीश्वरं पृथग्दृशस्ते न पश्यंति किंतु हंतारमेव हंतारं हतमात्मानमभिमन्यंते इत्यर्थः २७ विशुद्धं यथा भवति २८ २९ कंसायनमः

नातिकोविदाः दृष्टमात्रमतयः नदीर्घदर्शिनः ३० न निर्गता निर्दशाहानि येषां तान् अस्माकम् ३१ ३२ अस्यतः विक्षतो-
ध्यातः सतः उत्सृज्य रणं त्यक्त्वा ३३ ३४ अन्यासक्तान् विमुखान् वा अन्येति न हंसि न हिनस्ति ३५ क्षेमे निर्भये देशे शूरैः संयुगादन्यत्र
विकत्थनैः प्रौढिवादिभिः नन्वेवं विभेमि शंभोर्भक्त्रेति चेन्नत्याहुः रहोजुषा हृदि सर्वस्य ध्येतः प्रविष्टेन क्वचिद्दिगाहि रहदृष्टेनेत्य

॥ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः ३० एवं चेत्तर्हि भोजें-
द्र पुरग्रामव्रजादिषु अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ३१ किमुद्यमैः करिष्यंति देवाः समरभीरवः
नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ३२ अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः जिजीविषव उत्सृ-
ज्य पलायनपरा ययुः ३३ केचित्प्रांजलयो दीना न्यस्तशस्त्रा दिवौकसः मुक्तकच्छशिखाः केचिद्भीताः
स्म इति वादिनः ३४ न त्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसंवृतान् हंस्यन्यासक्तविमुखान्भग्न-
चापानयुध्यतः ३५ किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः रहोजुषा किं हरिणा शंभुना वा वनौकसा किं-
मिंद्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता ३६ तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ततस्तन्मूलख-
नने नियुंक्ष्वास्माननुव्रतान् ३७ यथामयोऽङ्गे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुं यथेंद्रि-
यग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते ३८ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः त-
स्य च ब्रह्म गोविप्रास्तपो यज्ञाः सदक्षिणाः ३९ ॥

ये: पुरप्रवेशरहितं अभिलोष्य तु वनमोको यस्य तेन शंभुना वा ३६ यद्यप्येवं देवा न किंचिदपि कर्तुं समर्थास्तथा-
पि नोपेक्ष्या इत्यन्वयः चेवेत्याहुस्तथापीति ३७ रूढपदः बद्धमूलः ३८ देवानां मूलं विष्णुः स च यत्र धर्मस्तत्रास्ति धर्मस्य मू-
लं वेदादय इति ३९ कुसापनम्:

४१ किंच विप्रादयो हरेरेव तनवः यस्मात्तस्माद्वधमेवोपाय इत्याह ४२ ४३ ४४ आरात्समीपमागतो मृत्युर्येषां ४५ सतां विद्वेषो न महत्सु मात्रेऽपि तु किंतु बहुतरं च कारीत्याह आयुः श्रियमिति ४६ दशमे चतुर्थः

दा

॥ तस्मात्सर्वात्मना राजन् ब्राह्मणान्ब्रह्मवादिनः तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ४० विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ४१ स हि सर्वसुराध्यक्षो ह्यसुरद्विड् गुहाशयः तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः अयं वै तद्वधोपायो यदृषीणां विहिंसनं ४२ श्रीशुक उवाच एवं दुर्मंत्रिभिः कंसः सह संमंत्र्य दुर्मतिः ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः

सा

४३ संदिश्य साधुलोकस्य कदने कदनप्रियान् कामरूपधरान्दिक्षु दानवान्गृहमाविशत् ४४ ते वै रजः प्रकृतयस्तमसा मूढचेतसः सतां विद्वेषमाचेरुरारादागतमृत्यवः ४५ आयुः श्रियं यशो धर्मं लोकानाशिष एव च हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ४६ इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्थोऽध्यायः श्रीशुक उवाच नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः आहूय विप्रान्वेदज्ञान्स्नातः शुचिरलंकृतः १ वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै कारयामास विधिवत्पितृदेवार्चनं तथा २ धेनूनां नियुते प्रादाद्विप्रेभ्यः समलंकृते तिलाद्रीन्सप्तरत्नौघशातकौंभांबरावृतान् ३

तु

पंचमे जातके नंदः सूनोः कृत्वा महोत्सवे ब्रजे महामनाः विप्रैः कृतस्नान उदारधीः १ महामना उदारचित्तः १ २ नियुते द्वे लक्षे सप्त तिलपर्वतान् आप्रादात् कथंभूतान् रत्नौघैः रत्नसमूहैः शातकौंभांबरैः सुवर्णवस्त्रैः आवृतान् ३

दीपकोद्यम्

उव्यायांगोहिरण्यादीनांमध्येकेषांचित्तैरेव युक्तिर्यथा तथादानादिपुत्रजातकर्मादिसंस्कारैवगर्भारायां शुचिरितिद्वीपितुप्रतिनियतानिशौचकानिदृष्टांतत्वेनोदाहरन्ति कालेनेतिकालेनस्नानादिस्नानेनदेहादिशौचेनामेध्यलिप्तादिसंस्कारैर्गभादित्तपसादृष्ट्यादिदेवैर्ध्यादिसंतुष्टामनः आत्मा आत्मविद्येति ४ सोमेगल्पागिरःस्वस्तिवाचकाविप्रादयोवधूः तत्रस्थिताः पौराशिकाप्रोक्तामागधावंदिनस्त्वमहाप्रेताः भक्ताव सदृशाः ५ संमृष्टानिसंसिक्ता

कालेनस्नानशौचाभ्यांसंस्कारैस्तपसेज्यया शुद्ध्यंतिदानैःसंतुष्ट्याद्रव्याण्यात्माऽऽत्मविद्यया ४ सोमंगल्यागिरोविप्राः सूतमागधवंदिनः गायकाश्चजगुर्नेदुर्भेर्यःशंखदुंदुभयः ५ संमृष्टसंसिक्तद्वाराजिरपथांतराः चित्रध्वजपताकास्रक्चैलपल्लवतोरणाः ६ गावोवृषाश्चवत्सतरा हरिद्रातैलरूषिताः विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ७ महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः गोपाःसमाययूराजननानोपायनपाणयः ८ गोप्यश्चाकर्ण्यमुदिता यशोदायाःसुतोद्भवं आत्मानंभूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ९ नवकुंकुमकिंजल्कमुखपंकजभूतयः बलिभिस्त्वरितंजग्मुः पृथु
श्रोण्यश्चलत्कुचाः १०

निदाराशिलाजिराणि ओगल्नानिगृहान्तराणिगृहमध्यानियस्मिन्सतथा वंदि चित्रध्वजेषुपताकासुस्रजश्चैलपल्लववतोरणानिचयस्मिंस्तत् ६ हरिद्रातैलरूषितालिप्ताः विचित्राधातवबर्हास्रजश्चवस्त्राणिचकांचनमालाश्चालंकारतयाविद्यंतेतथाभूताःगावृषादयोवत्सतरास्पर्शः ७ ८ आकल्पा अलंकाराः ९ नवकुंकुमकिंजल्कैःमुखपंकजेभूतिः
श्रीर्यासांताः १० ॥

स्रग्स्रष्टानि उज्ज्वलितानि मणिमयानि कुंडलानि यासां निष्काः पदकानि कंठेषु यासां ताः अंबराणि शिखासु च्युतानि माल्यवर्षा
णि याभ्यां ताः नंदालयं व्रजंती व्रजेभ्यः पथि विरेजुः सवलयाः कंकणान्विताः व्यालोलैः कुंडलादिभिः शोभा जाता यासां ताः ११ जनैर्मिथ्यं

गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः नंदालयं सवलया व्रजतीर्वि
रेजुर्व्यालोलकुंडलपयोधरहारशोभाः ११ ता आशिषः प्रयुंजानाश्चिरं पाहीति बालके हरिद्राचूर्णतैलाद्भिः सि
ञ्चंत्यो जनमुज्जगुः १२ अवाद्यंत विचित्राणि वादित्राणि महोत्सवे कृष्णे विश्वेश्वरेऽनंते नंदस्य व्रजमागते १३
गोपाः परस्परं हृष्टाः दधिक्षीरघृतांबुभिः आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः १४ नंदो महामनास्तेभ्यो
वासोऽलंकारगोधनं सूतमागधवंदिभ्यो येऽन्ये विद्योपजीविनः १५ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत्
विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च १६ रोहिणी च महाभागा नंदगोपाभिनंदिता व्यचरद्दिव्यवासःस्रक्कंठाभ
रणभूषिता १७ तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप १८ गो
पान्नंदो कुलरक्षायां निरूप्य मथुरां गतः नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह १९ ॥ ॥ ॥ ॥

न्यः अजननमुज्जगुरितिवा १२ १३ १४ तेभ्यः गोपेभ्यः प्रादात् १५ यथोचितमन्नपानपिंशाः अपूजयत् १६ १७ हरेर्निवा
सेन ये आत्मनि गुणास्तैः रमायाः क्रीडं विहारस्थानं १८ वार्षिकं प्रतिवर्षदेयं १९ कृष्णाय वासुदेवाय नमः ॥ श्री कृष्ण ॥

भ्रातरं सखायं तदवमोचनं तत्स्थवसतिस्थानं २० २१ २२ २३ पुनर्भवः पुनर्जातः तद्रूपं तत्र हेतुगर्भविशेषणं संसारचक्रे वर्तमान इति २४ दुर्लभं त्वमेवाह नैकत्रेति प्रियैः सह संवासः प्रियसंवासः हे प्रिय इति वा श्लोकस्यार्थो द्योतनीयमानानां प्रवर्तीति प्लवाः तरणकाष्ठादयस्तेषां यथा एकत्र स्थितिर्नास्ति तद्वत् २५ कच्चिदिति पश्वादिहितं निरुजं निर्दोषं पयोद

गा ३

वसुदेव उपश्रुत्य भ्रातरं नन्दमागतं ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनं २० तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतं प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः २१ पूजितः सुखमासीनः पृष्ट्वानामयमादृतः प्रसक्तधीः स्वात्मजयोरिदमाह विशाम्पते २२ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत २३ दिष्ट्या संसारचक्रेऽस्मिन्वर्तमानः पुनर्भवः उपलब्धो भवानद्य दुर्लभं प्रियदर्शनं २४ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणां ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा २५ कच्चित्पशव्यं निरुजं भूर्यम्बुतृणवीरुधं बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः २६ भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे तातं भवन्तं मन्वानो भवद्भ्यामुपलालितः २७ पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभावितः न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते २८ नन्द उवाच अहो ते देवकीपुत्राः कंसेन बहवो हताः एकावशिष्टावरजा कन्या सापि दिवं गता २९

ते

व्यादि प्रभूततृणादिकाः तन्मादिना पुत्रस्नेहविवश्यायायप्रसक्तधीः स्वात्मजयोरित्युक्त्वा तत् २६ भवद्भ्यामुपलालितः सन् कच्चित्तद्धर्मं तदर्थं तिष्ठति शेषः २७ पुत्रादर्शने क्लेशाभावं हृत्सु इति सुहृदेव धर्मे प्रत्यनुभावितः संपादितोयस्त्रिवर्गः सहिपुंसो विहितः पुंसः श्रेयसाय प्रोक्तः न स्वमात्रपर्यवसितः अतस्तेषु क्लिश्यमानेषु सुखायन भवतीत्यर्थः २८ नन्दो वसुदेवं सांत्वयन्नाह अहो इति २९ ॥

अदृष्ट एव निष्ठा समाप्तिर्यस्य सः यद्वा पुत्रादि सुखपरं अदृष्टं ही यत्तत्तदैव पुत्राद्यात्मनोवेतीत्यर्थः अदृष्टपरमः तदा
अदृष्टमेव परमं यस्य सः यद्यपि पुत्राद्यो विषुका स्तथापि तानदृष्टमेव पुनः संगमयतीत्यर्थः एवमदृष्टमात्मनस्तत्वं अवधि
वाधिकारतां सुखदुःख यथार्थं दसनमुह्यति तस्मादिदानीं त्वत्पानेदुःखं भावनीयं क्षतानामपि विसृष्टानामपि विमुक्तानामपि
येकाल्पेनतरेदृश्वीनैयोगयोः संभवात् अस्मादिभिरपि कालांतरे नद्धियोग संपदीतिनेदस्य देवी या गौ या भावि सति वित्ती ३०

नूनं ह्यदृष्टनिष्ठोऽयमदृष्टपरमो जनः अदृष्टमात्मनस्तत्वं यो वेद न स मुह्यति ३० वसुदेव उवाच करो वै
वार्षिको दत्तो राज्ञे दृष्टौ युवां च वः नेह स्थेयं बहुतिथं संत्युत्पाताश्च गोकुले ३१ श्रीशुक उवाच इति नंदादयो
गोपाः प्रोक्तास्ते शौरिणा ययुः अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलं ३२ इति श्रीभागवते महापुरा
णे दशमस्कंधे वसुदेवसंगमो नाम पंचमोऽध्यायः श्रीशुक उवाच नंदः पथि वचः शौरेर्न मृषेति विचिंतय
न् हरिं जगाम शरणमुत्पातागमशंकितः १ कंसेन प्रहिता घोरा पूतना बालघातिनी शिशूंश्चचार निघ्नंती
पुरग्रामव्रजादिषु २ न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र
हि ३ सा खेचर्येकदोत्पत्य पूतना नंदगोकुलं योषित्वा मायया त्मानं प्राविशत्काम चारिणी ॥ ४ ॥

ततो गच्छ वसुदेवो दुःखं कंसस्य कालं नंदमाह करो वै इति वः युष्माभिः ३१ अनोभिः शकटैः ३२ इति दशमे पंचमः षष्ठे सख्या शिशनं दोव्र
जेगच्छन्तौ पथि दृष्ट्वा तु याद् सीं तस्यामसुं कृत्वोच विस्मितः १ १ २ कंसभविषये गोकुमानं राजानं प्रति अविषये प्र
रस्या सेवमरिष्यतीति सूचयन्नाह न यत्रेति यत्र श्रीकृष्णस्य श्रवणादीनि न संति तत्रैव तासां शक्तिः सा दानास्मिन्नेव सति
का शंकेति भावः ३ योषित्वा वेषतो वरो नारी भिव आत्मानं विधाय तेन नि र्लज्जानि र्विशे का चसतीकच्ध परस प्रविष्टा
तत्राह कामचारिणीति नहि काम चारिणी किंचिद्दुर्घटमित्यर्थः ४

तावन्निजां पत्निं दृष्ट्वा आगतां प्रति रूपवती अयमिव गोप्यो ऽसमे सन्ते त्वज्जरञ्जलोके तान्वयः श्री साम्यांति विशेषणानि
शावे चे व्यतिषङ्गमल्लिकोच मिल्ले संसक्तमल्लिकाऽकुसुमे वहन्तानि तेवेनस्तना मांच ऽभय आगतोतमिव कृष्णंकृशम
ध्यमभृदरे यस्यास्तां मृवासमंरसरणी येवासमी यस्यास्ता कंवित्त योर्कसी भूषणाये: त्रिवाउलसत्पिः कुंतले मेंडितमा
नने यस्यास्ता ५ वल्गुस्मिता योगविसर्गवी हितैः वल्गुस्मिते येषु तेतथा भूता अपांगविसर्गायेषु ते वीतेषु
जोवस्तुमनोहरं तीम्प्रतीपादत्तमनस्वितता न निवारिते वेतइ १७ तो भवति गोपस्त्वसिंयमिवमत्वा तेऽमीं आस न अतः एनाम्

॥

तां केशावबंध व्यतिषङ्गमल्लिकां वहन्तिं तं व स्तन कुङ्कुम मध्यमां स्त्रवासस लंकेपितकर्णा त्वणादि
बोल्लसत्कुंतलमण्डिताननां ५ वल्गुस्मिता योगविसर्गवीक्षितैर्मनोहरं तां वनितां पति जो के सो प्रम
सतीमोक्षं करे राज्ञीस्तव निरां हो पापः अयं दुःखमिवागतंपतिं ६ बालो ऽकस्तत्र विचिन्तिनी शिशुं
पदे शयानंदगतं सदैतकं बालं प्रतिच्छन्न निजोरुतेजसं ददर्श तल्पे ६ जिमिवाहितं बहिः ७ विबुध्य तां बा
लकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः अनेन ममारोपयदंकमन्तकं यथोरगं सुप्तमबुद्धिरज्जुधीः ८

निवारितासतीप्रविवेशेति भावः ६ बालोऽकः स्तनं प्रसदं तकं बाल्यं केददर्श असताम्येतनं दृष्ट्वा कथं न विमेति तत्रा
हमति छन्नं निजोरुतेजसं बालमावेन प्रतिछन्नं तिरोहितं निजं उरुतेजो येन तं अमिवभसि भस्मनाच्छादितमग्निमिवेति ७ चराचरा
त्म्यादेवतां विबुध्य निमीलितेक्षणा आसस्य यमनेन दुष्टान्तामेतके केसां कं मारोपयत् बाले मत्वा यथोरगं सुप्तमबुद्धिस्ता सो
रज्जुधीः अतः अनातृतोरज्जुबुद्ध्या गृह्णाति तितथा नहेतु ८ ॥ ॥ ॥ कृष्णायनमः

श्रि

१० गो
भादस

कृ.टी.
१०

ननु यशोदा रोहिणी गोपी तौ कथं न न्यवारयेतां तत्राह यामयल्लोकुत्तनन्याद्वेषी इतं च स्यांतां वरस्त्रियं च सहसैव अंतरागहम
च्चोवि हरप अंतसैर द्वोप यात्रि म्निदवेदमां ततः कोशपरिछदासिकत् मदुर्वित्रमयः कोशाः परिछदः आवरणं यस्य असैः रवडू स्यतह
त् तन्मनया चेष्टिते अपि मत्ते हमस्य जननी इयं चेति मोहिते च स ती जनी जनन्यौ नि रीक्ष्य मास्ती १७ केवलं मति स्थिते नतु निवारितव
त्यौ ९ तस्मिन्स्थाने दुर्जरे वीर्यं यस्मिन् तं स्तनं तं ओष्ठ लेखे कं मा दाय तस्तै शिशावेददौ अथ नंतरमेव सपी सा केवलं विषमय

तौ तौ द्वयं विज्ञाय सितावाम चे ष्टितां धी हरोत राकोश परिछदासि वत् वरस्त्रियं तत्स मया चेष्टितं निरीक्ष्य
मासौ जननी स्थिति वृत्ता ८ तस्मिंस्तनं दुर्जरवीर्य मुल्वणं श्वेत रोक्रमादाय शिशोर्ददावेषा गाढं करात्यां भगवा
न्नपि प्रतन्मारोषः स मंरोष समन्वितो ऽपिवत् १० सा मुंच मुंचालमिति प्रभाषिणी निपीड्यमाना ऽखिल
जीव मर्मसु विवृत्य नेत्रे चरणौ भुजौ मुहुर्निर्विन्नगात्रा क्षिपती रुरोदह ११ तस्याः स्वनेनाति गभीर रंहसा
साद्रिर्मही द्यौश्च चचाल सग्रहाः रसादिशश्च प्रतिनेदिरे जनाः पेतुः क्षितौ वज्र निपात शंकया १२ निशाचरी
त्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि प्रसार्य गोष्ठे निजरूप मास्थिता वज्राहतो वृत्र इवा
पतन्नृप १३ पतमानोपि तद्देहस्त्रिगव्यूत्यन्तर द्रुमान् चूर्णयामास राजेंद्र महदासीत दद्भुतम् १४ ५

यामिति सत्वे वस्याः प्राणैः सहापिवत् १० चरणौ भुजौ च मुहुर्मुहुः क्षिपंती निः स्विन्नानि स्वेदयुक्तानि गात्राणि
यस्याः सा ११ रसात्त लोमिव १२ व्यादाय मुखं विवृत्य निजरूपे आस्थिता मरणा समये कपटमयुक्तमितीव १३ प
तन्नपि तस्याः देहः षड्कोशमध्यवर्तिनो द्रुमांश्चूर्णी चकार १४ ॥ ॥कृष्णायनम॥ ५॥

शा२

मा२८ ईषामात्रोऽयं दृश्यते वृषाल्लांगलस्य दंडः तत्प्रमाणा उग्रा दृष्टा यस्मिन् तत्र यथा मृत्स्ना स्यं यस्मिन् तत्तस्याः कलेवरं कीदृक् गोपाः गोपस्त्रस्ते संगमः संगा सेतुत्वेन पुनरस्य सिंधवः विपुलनिष्ठि गिरिकंदरनते नासिके यस्मिंस्तत् गिरेः वृत्तौ स्थूल पल्लौ ताविव स्तनौ यस्मिंस्तत् रोडुवीरे प्रकीर्णा अस्य दृष्टा मूर्द्धजा यस्मिंस्तत् १५ अथ कूपा विवरगभीरे अहिसीमा यस्मिन्नत्र पुलिनवदारो

ता कौजघने भ्रांभी परं वृष्टा एतस्य ईवनजो रूक्षं अंघ्रीच यस्मिन्नतत् शून्यतो ग्रहृदरखंडदरं यास्मिन् तदिति १६ पूर्वमेषां तस्याः

२१ शब्देन भीताः पुनर्दर्शनेनाति न अस्तित्वात् पूर्व विति तस्मा निस्वनितं शब्दैस्तैरतिशि ल्लानि हस्ते तरी मस्तकानि येषां ते १७

ईषामात्रोऽयं दृश्यते गिरिकंदरनासिकं गाढवीलस्तनेरो दुमकीर्णाग्रमूर्द्धजं १५ अथ कूपगंभी रात्पुलिनारो हम्भारवं वृक्षसेतु मूर्जो वैश्रि शून्यतोय दुदोदरं १६ ते तच्छब्दः स्नन्तवी स्पैगोपाःगोपाः कलेवरं पूर्ववत्तत्तुः स्वनितं निश्चेष्टा धरौ मस्तकाः १७ बाले वे तस्या उरसि क्रीडन् मकुतोभयं गोपबाला स्समन्तात्पृ जग्मतुर्जीत सेनकाः १८ पुत्राणां दारिणीं संस्थिता स्मरण बालस्य सर्वपाः रक्षां विदध्युरेस म्यक् विरिच्यिरे गोपुच्छ भ्रमणादिभिः १९ गोमूत्रेण स्नापयित्वा पुनर्गोरजसा र्भकं रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः २० गोप्यः संस्पृष्ट सलिला अंगेषु करयोः पृथक् न्यस्या त्मन्यथ बाले स्य बीजन्यासमकुर्वत २१ अव्यादजोंघ्रि मणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं ह यास्यः हृत्केशवस्त्वदुर ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं २२ ॥ ॥ ॥

पद १९ द्वादशांगेषु ललाटादिषु केशवादिद्वादशनामभिः २० अनावृत्त्य स्व प्रथममति संगमे सोऽवरः तोऽदृत्याङ्गि वि ल्यैः स्वश्वासाः पुनस्तत्त्पर्य राणी जन्मा स्वमकुर्वते त्याहजोव्यादिति स्पृष्टसलिलाः आचांता आत्मनि प्रथममंगेषु कर योश्च पृथक् अजादिकादशावी जानां न्यासंकृत्वा तदौ श्री शिकरयोः संधि भुवं धारितध्या अंगुष्ठादावेकै केबीजं न्यस्य बालस्या

ष्पगेषु न्यासं कुर्वत २१ अंघ्री अंघ्री जानुनी जंघे गोवं शिरः २२ कृष्ण २१

तथा दिक्षु रक्षां कुर्वन्ति स्मा(?) चक्र्यग्रत इति चक्र सहितो हरिरग्रतो ऽस्तु सहगदो गदा सहितो हरिस्तव पश्चादस्तु त्वत्पा र्श्वयोर्धनुर्धरो मधुहा असिधरो ऽजनश्च कोणेषु शंखधर उरुगाय उपेन्द्रस्तु कौ क्षितौ अधः स्थाने २३ एवं वेदीरक्षां कृत्वा ऽन्तरंगा रक्षां कु र्वन्ति स्म इन्द्रियाणीति २४ आत्मानं मनो ऽहंकारं २५ २६ २७ २८ २९ सं न्यवेशयत् शायितवती ३० विस्मये मे नाह नूनमि

चक्र्यग्रतः सहगदो हरिरस्तु पश्चात् त्वत्पार्श्वयोर्धनुरसी मधुहा ऽजनश्च कोणेषु शंख उरुगाय उपर्युपेन्द्रस्ता र्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात् २३ इन्द्रियाणि हृषीकेशः प्राणान्नारायणो ऽवतु श्वेतद्वीपपतिश्चित्तं मनो योगेश्व रो ऽवतु २४ पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः क्रीडन्तं पातु गोविन्दः शयानं पातु माधवः २५ व्रजन्तम व्याद्वैकुण्ठ आसीनं त्वां श्रियः पतिः भुञ्जानं यज्ञभुक् पातु सर्वग्रहभयंकरः २६ डाकिन्यो यातुधान्यश्च कूष्माण्डा ये ऽर्भकग्रहाः भूतप्रेतपिशाचाश्च यक्षरक्षो विनायकाः २७ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः उन्मादा ये ह्य पस्मारा देहप्राणेन्द्रियद्रुहः २८ स्वप्नदृष्टा महोत्पाता वृद्धा बालग्रहाश्च ये सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभी रवः २९ शुक उवाच इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणं पाययित्वा स्तनं माता संन्यवेशयदात्मजं ३० ताव न्नंदादयो गोपा मथुरायाः व्रजं गताः विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ३१ नंदादय ऊचुः नूनं वतर्षिः संजातो योगेशो वा समास सः स एव दृष्टो ह्युत्पातो यदाहानकदुन्दुभिः ३२ शुक उवाच कलेवरं परशुभिश्छि त्वा तत्ते व्रजौकसः दूरे क्षिप्त्वा ऽवयवशो न्यदहन्काष्ठवेष्टितं ३३ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः
उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ३४

ति वत विस्मये सो ऽयं ऋषिस्तपः प्रभावात् योगेशो ज्ञानी वा सम्यगास पतः स एव दृष्ट इति ३२ ३३ विस्मयांतरमाह दह्य मानस्येति कृष्णेन निर्भुक्तः अतएव सपद्याहतः पाप्मा यस्य ३४ ॥ ॥ ॥ कृष्णाय नमः ॥

प्रसंगात्तद्वैमत्यन्यायेन भक्तैवैतत्व माहपूतनेति ३५ श्रद्धया आस्तिक्येन भक्त्या प्रेम्णा रक्ताः स्निग्धाः यास्तन्मातर इति
वत्साहरणात्प्रोत्त्याभिप्रायेणाव हुवचनं गोगोपिकास्तदीमातरोऽभवन्निति ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ एत

पूतनालोकबालघ्नी राक्षसी रुधिराशना जिघांसयापि हरये स्तनं दत्त्वाप सद्गतिं ३५ किं पुनः श्रद्धया भक्त्या
कृष्णाय परमात्मने यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ३६ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोक
वंदितैः अंगं यस्याः समाक्रम्य भगवानपि तत्स्तनं ३७ यातुधान्यपि सा स्वर्गमवाप जननीगतिं कृष्णभुक्तस्तन
क्षीराः किमु गावोऽनुमातरः ३८ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलं भगवान्देवकीपुत्रः कैवल्या
द्यखिलप्रदः ३९ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणं न पुनः कल्पते राजन्संसारोऽज्ञानसंभवः ४०
कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः किमिदं कुत एवेति वदंतो व्रजमाययुः ४१ ते तत्र वर्णितं गोपैः
पूतनागमनादिकं श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ४२ नंदः स्वपुत्रमादाय
प्रेत्यागतमुदारधीः मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ४३ य एतत्पूतनामोक्षं कृष्णस्यार्भक
मद्भुतं शृणुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिं ४४ इति श्रीभागवते महापुराणे दशमस्कंधे पूत
नामोक्षो नाम षष्ठोऽध्यायः ६ ॥ ॥ ॥

तदाश्चर्यं कं चरितं किं तत्पूतनामोक्षमिति अत्र तु दैत्यकुलान्तिईशः पूतनायाः शिशुच्छलात् स्तन्याऽपो पानतः प्राणैः
साराणाहृतिमकल्पयत् ४४ दशमे षष्ठः ॥ ६ ॥

७ताक्षिपन् शकटं ०पोषित रणा वर्त्त सर्पः क्षिपन् इति पत्रतिस्य भाष्ये दशमस्कंधे श्रीधरस्वामिकृतायां भावार्थदीपिकायां ... इति सप्तमे ... कृष्णार्भकसुधासिंधुसंप्लवानंदनिर्भरः भूयस्तदेव संप्रष्टुं राजा मत्वाभिनंदति येन येन अवतारेणापि यानि यानि कर्माणि करोति तानि नः कर्णरमाणि मनःप्रीतिकराणीति च भवंत्येव १ तथापि यत् शृण्वतः पुंसः पुरुषस्य अरतिर्मनोग्लानिः तन्मूलभूताधिविद्या तृष्णा च अपगच्छति तथा सत्त्वं शुद्ध्यति हरिभक्तिर्हरिदासस्य सख्यानि च भवंति तदेव हारं हरेः चरितं मनोहरं वा वद मन्यसे चेत् अनुग्रहे

राजोवाच येन येनावतारेण भगवान् हरिरीश्वरः करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो १ यच्छृण्वतोऽपैत्यरतिर्वितृष्णा सत्त्वं च शुद्ध्यत्यचिरेण पुंसः भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत् २ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतं ॥ मानुषं लोकमासाद्य तज्जातिमनुरुंधतः ३ श्रीशुक उवाच कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषितां वादित्रगीतद्विजमंत्रवाचकैश्चकार सूनोरभिषेचनं सती ४ नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः ५ औत्थानिकौत्सुक्यमना मनस्विनी समागतान् पूजयती व्रजौकसः नैवाशृणोद्वै रुदितं सुतस्य सा रुदन् स्तनार्थी चरणावुदक्षिपत् ६

यदि करोषीति २ अथो तत् कौतुकं पुनर्विशिनष्टि अथेति अनुरुंधतोऽनुकुर्वतः ३ उत्थानं शिशोरंगपरिवर्तनं तन्निमित्तं यत् कौतुकं मंगलस्नानं तदेव आप्लवः अभिषेकः तथा तस्मिन्नेव दिने जन्मनक्षत्रस्यापि योगे अतिरहोत्सवे समवेतयोषितां मिलितपुरंध्रीणां मध्ये वादित्रादिभिः शोभितमभिषेचनं चकार ४ अन्नादिभिः सुपूजितैर्विप्रैः कृतमंगलं संजातनिद्रे अक्षिणी यस्य तं अशीशयत् शायितवती शकटस्याधस्तादेव ५ उदक्षिपत् ऊर्ध्वं चालितवान् ६

तद्यथः शयनस्य शिरोरत्यय आब्दमौ प्रवालय नदद्धयो विंतेन हतं सकदं बव तताविपरीतम
पतत् कथं विन्यस्तानि नानारस वंति कुप्यभाजनानि स्वरीरजताति दिक्तौ कांस्यादिमयानि यथा भवं
ति तथा च क्रे च प्रह्लभ्र च कांश्या: असस्ताव काश्या: यास्मन्निमित्त: कुवरोधु अंधरोपस्य तस्व यथा
भवति यथावर्ततेति ७ अद्भुतदर्शनेन श्रीकृष्णावस्थु: तदेवाह कथमिति विपर्यगात् विपरीत
मपतदिति ८ ९ नं अहृदयि रविस्वा सततञ्च्युः उत अपि जालस्थे तन्न संभवति रते च बाला: किंजा

अथ: शयानस्य शिरोरत्यस्य प्रवालस्य दुःखि हतं अवर्तत विन्यस्तनानारसकुप्यभाज
नं पस्त च कांश्य विभिन्नकुवरं ७ इत्थं पशोदाप्र कृत्वा व्रजस्त्रियश्च श्रोत्यानि केवलं सौख्यापा: स
मागता: नंदादयश्चाद्भुतदर्शनाकुला: कथं स्वयं वै शकटं विपर्यगात् ८ इतिमुवंतोति विस्मा
दमोहिता जना: प्रमंता त्वंथिवपुरान्तगत् ऊचुरव्यवसितमतीन् गोपान् गोपीश्च बालका: रुद
तानेन पादेन क्षिप्रमेतन्न संशय: ९ नते प्रहृदधिरे गोपा बालस्य भाषितमप्युत अप्रमेयं बल
स्यं तस्य बालकस्य नते विदु: १० रुदंतं सुतमादाय यशोदा ग्रहशंकिता कृतस्वस्त्ययनं विप्रै:
सूक्तै: स्तनमपाययत् ११ पूर्ववत् स्थापितं गोपैर्बलिभि: सपरिच्छदं विप्रा हुत्वार्चयां च
क्रुर्दध्यक्षतकुशांबुभि: १२ ये सूयानृत दंभेर्ष्या हिंसा मानविवर्जिता: न तेषां सत्यशीला
नांतीति १०
माशिषो फला: कृता: १३

नंतीति १० रक्षोघ्नै: सूक्तै: अथ कृता १० अगवत प्रभावानभिज्ञा विप्रबोधितं विवे बन्नाह पूर्व
वादित्यादि ना बलिभि: शान्तौ: यद्वा अधुद्रव्यै वा बलिभि: सहितं सपरिच्छदं यथा पूर्ववत् स्थापि
तं विप्रा: हुत्वादिमि रर्चयामासु: हैताम्रहाद्दिहीतं विज्ञाय १२ असूयाऽनृतो दुदो बाधि
क्ररतां ईर्ष्या अशान्ति स्तेषामाशिष: कृता स्ते: प्रयुक्ता: १३

इति स्वप्नमिति प्रेम सम्पूर्णं मुनिरूपाकृते संस्कृतैः पवित्रान्नौघपयोयैर्भुञ्जते भृतैः कृत्वा द्विजोत्त
मैः कृति मिरस्मिन्किञ्च सम्प्रति चैकं कारयित्वा १४ हुत्वा हावयित्वा १५ गावं गाव प्रदात् अन्नभुञ्ज
तस्याशिषो पयुञ्ज १६ तथेव वक्त्रं गुरि सर्पः १७ उत्क्षिप्य सह पादेन शकटं यो मुक्तीलया दराग व
तपिद्वा पीडयन्नुप पात यदर्भकः अहो सहसंसंग दशायते स्वप्नमुपरिहायरो हस्तेनैव अनेत सं

इतिवास्कया हाय सत्यं पितुरपाकृतैः जलैः पवित्रैर्द्विजैः सन्निधि समिद्धि द्विजोत्तमैः १४ वाच
यित्वा स्वस्त्ययनं नन्दगोपः समाहितः हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणं १५ गावः
सर्वगुणोपेता वासः स्रग्रुक्ममालिनीः आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुञ्जत १६ वि
प्रा मन्त्रविदो युक्तास्तैर्याः प्रोक्तास्तथाशिषः ता निष्फला भविष्यन्ति न कदाचिदपि स्फुटं १७
एकदारोहमारूढं लालयन्ती सुतं सती गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् १८ भू
मौ निधाय तं गोपी विस्मिता भारपीडिता महापुरुषमादध्यौ जगतामास कर्मसु १९ दै
त्यो नाम्ना तृणावर्तः कंसभृत्यः प्रचोदितः चक्रवातस्वरूपेण जहारासीनमर्भकं ॥२० गोकु
लं सर्वमावृण्वन्मुष्णंश्चक्षूंषि रेणुभिः ईरयन्सुमहाघोरशब्देन प्रदिशो दशः २१ मुहूर्त
मभवद्गोष्ठं रजसा तमसावृतं सुतं यशोदानापश्यत्तस्मिन्न्यस्तवती यतः २२ नापश्यत्कश्च
नात्मानं परं चापि विमोहितः तृणावर्तनिसृष्टाभिः शर्कराभिरुपद्रुतः २३ ७ ८

गा दुत्तारायह्त भारमजानती १८ उसात शंकया महापुरुषमादध्यौ श्रीकृष्णो हरवर्ति
नां जगतां भारेणा पीडिता विस्मिता रचयन्ती यद्वा जगतां मध्ये कर्मसु प्रासवभव नतु जग
दुदरं वे दे सर्पः १९ २० ईरयन्निनादयन्नि सर्पः २१ यतः यत्र न्यस्तवती तस्मिन्स्थानेनापश्यत् २२ २३

स्वरपवनचक्रात्पांशुवर्षे स्यति २४ उपारतः पांशुवर्षस्य वेगो यस्मिन् तथाभूते पवने सति तत्रस्थान् दितमनुशाम्यन्गो व्योरक्षदः २५ वात्या चक्रवातः तद्रूपचरः क्रूरः स्वं हरन् शांतरयः कथंचित्रभोगतः ततः पतंगं तु नाशं प्रौदित्सयी २६ गुरुमत्त या ति गोरवेशा तंतथा प्रनष्मातं प्रस्मवंतं पर्वतप्रायमप्यमानस्ते नैव श्वा जनो गले गृहीत वातं तं सक्तुमिव च लपि नाशं प्रौदित्सयः

इति स्वरपवनचक्रपांशुवर्षे स्वतपदवी सुवत्वाविलक्ष्यमाता श्रुतिकरशामनुस्मरं सद्विचोऽ सूप्रशंसुस्यः कदकुरनुपलम्यमनेकस्तु पवनत् उपारत पांसुवर्षवेगो २५ तदशाव नं मन्यमानश्वा स्मनोऽमुरयततया गलेगृहीतयत्नं तु नाशं प्रौदितुरिमारम्भत २६ तस्मस्मा हसामि श्रुतं दैत्यो निर्गतश्चोचनः अप्यन्तरा वो पपतत् महवाक्यो प्रस्तुदंजे २८ तं संतारम्या नमेता २९ प्राहयमात्रे प्रतिहृत्य विस्मिताः हो जैवत स्यो रसिलं वमानं तस्व सिम तं पुरुषादनी तं विहायसा ग सुमस्वा त्रपुनः ॥ गोपप्रगोपाः किसलं रक्षुरुपमाः स्पचापुनः प्राप्नुरतीव मोदं ३० धृःमयमेन लेनमयाहिम्सुयते ३१

१० २८ तस्योरसिलं वमानं कृष्णमादाय मात्रे प्रति हृत्य सन्तर्प्य विस्मिता अवमप्युरितिभृवि हायसा गगनमार्गेण अपवादेन नीतं तथापि न सुकरवात्प्रभृतं पुनर्लब्ध्वा प्रमोदं प्राप्नुरिति ३० परस्परं हर्षकथामाहुः अहो वतेति । निवर्तितगमितामन्तुं प्राप्तिः कोऽपि विस्मयोत्पद्यत एवेता दि ति ते ष्वेव केचिदाहु। हिंस्र इति ३२

नःस्यामि श्रीशौकृतं पूर्वं वापि कूपतडागादि निर्मितं दुःखं पञ्च यज्ञाग्निहोत्रादि दत्तं दानं यत् यस्मात्तप श्राद्धं प्रतापयन् हर्षयन् ३३ तेनावर्ती जोषेदृक्शोरवाशंकिनीं प्रसू बोधयन् दर्शयामास भूमं मसाशोकु देवजगत् ३४ पीत प्रायस्य पीतप्रायः स्तनो येन तस्य ३५ नगान् गिरीन् तद्दुहितर्न हीः ३६ दृष्टा मे सस्मः [illegible] येना सकवीस्य वास्की

किंनस्तप श्रीशौ मथ्योह्यजा र्चनं पूर्वं वदन्त मृतभूतस्योह हं पत्संपरेतः पुनरेव बालको दृष्ट्वा स्व कंथन प्रतापहृष्य स्थितः ३२ दृष्ट्वाद्भुतानि बहुशो नंदगोपो वृहद्वने वसुदेववचो भूयो मानयामास विस्मितः ३३ एकदार्भकमादाय स्वांकमारोप्य भामिनी प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ३४ पीतप्रायस्य जननी सुतस्य रुचिरस्मितं मुखं लालयती राजन् जृंभतो ददृशे इदं ३५ खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दुवह्निश्वसनांबुधींश्च द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि ३६ सा वीक्ष्य विश्वं सहसा राजन् संजातवेपथुः संमील्य मृगशावाक्षी नेत्रे आसीत्सुविस्मिता ३७ इति श्रीभागवते महापुराणे दशमस्कंधे तृणावर्तमोक्षो विश्वदर्शनं नाम सप्तमोध्यायः श्रीशुक उवाच गर्गः पुरोहितो राजन् यदूनां सुमहातपाः व्रजं जगाम नंदस्य वसुदेवप्रचोदितः १ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतांजलिः आनर्चाधोक्षजधिया प्रणिपातपुरःसरं २ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिं नंदयित्वाब्रवीद् ब्रह्मन् पूर्णस्य करवाम किं ३ महद्विचलनं नृणां गृहिणां दीनचेतसां निःश्रेयसाय भगवन् कल्पते नान्यथा क्वचित् ४

अकुतूहले [illegible] योगे च विश्वरूपं निरूप्यते १ विश्वरूपादि बालस्य निशाम्य शंकिनः पितुः नाम कर्म गर्गाचार्येण निर्जनं तत्र समस्तु चत् २ ३ पूर्णस्य [illegible] यमिनां गृहमागतस्त्वाह महद्विचलनमिति महतां त्वादृशां विचलनं स्वार्थी तु गृहीरसां संगमापनन्नुतार्हितं एवं महद्दर्शनार्थीकिमिति नाम छतित त्वाहदीनचेतसां कृपणानां क्षरणापि गृहस्य तु शकुंवतानि स्पर्थः ४

त्वया बालयोर्जातकर्मादिकं कर्तव्यमिति ननु तत्स्य जानाति तत्राह ज्योतिषामयनमिति पदत्रीन्द्रियं
ज्ञानसाधनं ज्योतिषामयनं तत्प्रतिपादकं ज्योतिःशास्त्रमित्यर्थः तत्साक्षात् भवता प्रणीतं येनायं पु
मान् परावरं परं कारणं पूर्वजन्मकृतं कर्म अवरं कार्यं यस्मिन् जन्मनि भावि फलं तदेतदुभयमपि जातके य
दुपार्जितं जन्मनि शुभाशुभं तद्वदति वेद इत्यर्थः। अंजनपाति शास्त्रं तत्र महर्षिरूपोऽयं इतीव पवि
त्रितमाह त्वं हीति देवज्ञो मंत्रविद्वल्त्वं स्वतोऽनायाम् नरसंस्कारादि संस्काराणां कर्तुमर्हसि स्वयं जन्मना ब्राह्मण
गुरुरिति चेत् नाहं नृणामिति ६ अस्तु त्वाहि तं नं प्रति गुरुत्वे तत्कार्ये सत्यपि प्रायेण प्रत्यक्षे संशयादिपा
र यदूनामिति भवतु तथापि त्वं प्रज्ञातं इति कोऽपि चार्दीति चेत्तत्राह सुतमिति ततः किं सत आह स्त

ज्योतिषामयनं साक्षात् यत्तज्ज्ञानमतीन्द्रियं प्रणीतं भवता येन पुमान्वेद परावरं ५ अहं हि ब्रह्म
विदां श्रेष्ठः संस्कारान्कर्तुमर्हसि बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ६ गर्ग उवाच यदू
नामहमाचार्यः ख्यातश्च भुवि सर्वदा सुतं मया संस्कृतं ते मन्यते देवकीसुतं ७ कंसः पापमतिः स
ख्यं तव चानकदुन्दुभेः देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ८ इति संचिंतयं श्रुत्वा देवक्या
दारिकावचः अपि हन्ता गताशंकस्तर्हि तन्नोऽनयो भवेत् ९ नन्द उवाच अलक्षितोऽस्मिन्रहसि
मामकैरपि गोव्रजे कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकम् १० ॥ ॥ ॥

मिति कंसो मन्यते मन्येत कस्मात् यदित्यर्थः ७ ननु यदुकुमार इति कथं विज्ञानातु तत्र वसुदेवस्य सुतस्त
त्रापि देवक्यां जात इति नु तौ जानीयात् तत्राह पापमतिरित्यादि ८ किमतः आह तथा संदेहादि देवकीकन्यावचः
श्रुत्वा अष्टमो गर्भो न स्त्री भवितुमर्हतीति निःसंशयं चिंतयन् सख्यादेन कापि हन्तीति ज्ञात्वा पुत्रयोः स्वस्वस्वस्
तितं चेन्न त्वकहे एवेदिति संभाव्य संस्कारसिद्धेनैव गतागताशंकः गतागता शंका यस्य सः अपि यदि
हंता हनिष्यति तर्हि तत्तदा नोऽस्माकं अनयः स्यादिति ९ किं जातिसंस्कारं द्विजातीनामावश्यकं कर्तव्यं
संस्कारमात्रं केवलं स्वस्तिवाचनपूर्वकं कुर्विति १०

५८

११ यदूनामपृथग्भावात् कृतच्छिद्रहेतोर्विभक्तिप्रथमानानां यदूनामपृथग्भावात् भावेऽभावेन यस्माद् अन्योन्यसिद्धयासर्वैकम
त्पकरणादित्यर्थः शम्सकर्षति स्वीकरोतीति संकर्षणम् उशन्तीत्यन्यत्तेवस्पेतीत्यर्थः गर्भसंकर्षणात्तु न प्रकाशयति ११ अस्य
तवपुत्रस्य अतः कृष्ण इत्येकं नाम भविष्यति १३ प्रागयमिति सामान्योक्त्या अभिप्रायेऽन्यं तत्रगतं नाम कथयति इतिने दोषस्य

श्रीशुक उवाच एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् चकार नामकरणं गूढो रहसि बालयोः ॥ गर्ग उवाच
अयं हि रोहिणीपुत्रो रमयन्सुहृदो गुणैः आख्यास्यते राम इति बलाधिक्याद्बलं विदुः ११ यदूनामपृथग्भावा
त्संकर्षणमुशन्त्युत १२ आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः
१३ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते १४ बहूनि सन्ति नामानि
रूपाणि च सुतस्य ते गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः १५ एष वः श्रेय आधास्यद्गोपगोकुलनन्दनः
अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ १६ पुरानेन व्रजपते साधवो दस्युपीडिताः अराजके रक्ष्यमा
णा जिग्युर्दस्यून्समेधिताः १७ य एतस्मिन्महाभागाः प्रीतिं कुर्वन्ति मानवाः नारयोऽभिभवन्त्येतान्विष्णुप
क्षानिवासुराः १८ तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः १९
श्रीशुक उवाच इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते नन्दः प्रमुदितो मेने आत्मानं पूर्णमाशिषां २०

तिस्म अतएव वासुदेव इति संप्रचक्षत इति १४ गुणानुरूपाणि ईश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोपतिर्गो
वर्द्धनो द्धारणः इत्यादीनि सर्वाणि अहमपि नो वेद जना अपि नो विदुरिति १५ जातकफलमाह एष इति आधास्यति
आधास्यति १६ अनेन रक्ष्यमाणाः समेधिताः अदस्यून्जिग्युरिति १७ १८ १९ इति आत्मानं प्रति समादिश्य आ
त्मानं पूर्णमाशिषाम् आशीर्भिः २० कृष्णायनमः

भा०र०

२६

बालक्रीडाचमत्कारैः कृष्णो मामेशाससंयुतः परमानंदमध्ये व्रजमंजेनेदं यशोदयोः तु आत्ममेव दर्शयन्नाह कालेनेति
२१ अनुकृष्य पुनः पुनराकृष्य सरीसृपंतौ अतिशयेन चलंतौ कथंभूतौ घोषाः कटिपादभूषणानां किंकिण्यादयस्तेषां प्रघोषे
णारुचिरं यथा तथा तेषां घोषाणां नादेन हृष्टमनसौ यद्यपि तौ लोकं ततस्ततो गच्छंतौ तं अनुसृत्य त्रिचतुराणि पदानि अ
ग्रतस्य मुग्धवत् प्रभीतवन्मात्रोरंति समीपे उपेयतुः उपजग्मतुः २२ तदा च तन्मातरौ निजसुतौ दोर्भ्यामुपगृह्य प्रमोदं ययतुः कथं
भूते घृणया पाहृतपरया स्नुवंत्यौ पयः स्रवंत्यौ पयोधरे सत्यौ पंके नांगरागेण च रुचिरौ कथंभूतं मुखं निरीक्ष्य मुग्धं मंदस्मितं

कालेन व्रजताल्पेन गोकुले रामकेशवौ जानुभ्यां सह पाणिभ्यां रिंगमाणौ विज
हतुः २१ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु तन्नादहृष्टम
नसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंति मात्रोः २२ तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ
पंकांगरागरुचिरावुपगृह्य दोर्भ्यां दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्प
दशनं ययतुः प्रमोदं २३ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः वत्सै
रितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः २४ शृंग्यग्निदंष्ट्र्यसिजलद्वि
जकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आ
पतुरलं मनसोऽनवस्थां २५

यस्मिन् अल्पा दशना यस्मिन् तत् २३ यर्हि अंगनानां दर्शनीया कुमारलीला ययोस्तथाभूतौ जातौ तदांतर्व्रजे
व्रजमध्ये तदबलाः प्रांगणास्तौ प्रेक्षंत्यः प्रेक्षमाणाः विस्मिता गृहकार्याणि हसंत्यो जहृषुः हर्षं प्रापुः कथंभूतौ ताभ्यां
प्रगृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणौ २४ अति च पलौ तौ पोरपादिभ्यो निषेद्धुं रक्षितुं तानि कर्माणि
कार्यं पक्षे यदा तयोः जनन्यौ न शेकाते तदा अलं मनसोऽनवस्थामापतुरिति गृहस्यास्य स्वस्य परा काष्ठा दर्शिता २५ ॥छ॥

कृ०ल०

२६

२६ २७ २८ कृष्णचापलचौर्यादिसीसैं वाखिलस्य रजः प्रजल्पंतः समागत्यगोप्यो गोप्येमूदं दद्युः अस समयेऽदोरूपकाले कोशे सं
जाते हासः सैव पंचौर्याद्यि तेनतु कृते तत्रापि स्वादुनेतरत् दधिवपयश्चान्ति किंचमोह्मकी नमर्कटान्नति विसर्जयद्दाति तेषामपि मध्ये
ते मत्वेन कोपि नास्ति वै तर्हि भांडं भिनत्ति कुचिदुष्या लोनेति सः न हाप वस्थामीति कुपितो याति यद्वा सगरहाग्रहिरास्ते न्मः कुपित
तोयातो कान्यर्यकादिषु सुमातु पश्को रूपं गेहं विल्वायाति २९ कल्पिते स्तेयधर्मे गेर्तुकामः तत्रप्रपंचयति हस्ताग्राह्यं इत्तिके गशि
कयस्थभांडेषु अंतर्निहिते दध्यादौ वपुर्नस्थानेयस्मः छिद्रं रचयति तदिति छिद्रत्वेनाविवत ध्वांतेषु कौ गेहे स्वांगमेवार्थप्रदीपं रचयति

कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा २६ ततस्तु भगवान्कृष्णो
वयस्यैर्व्रजबालकैः सह रामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं २७ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलं
शृण्वंत्याः किललत्मातुरिति होचुः समागताः २८ वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्य
थ दधिपयः कल्पितैः स्तेययोगैः मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे स गृहकुपितो यात्युपक्रो
श्य तोकान् २९ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ध्वां
तागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ३१ एवं धार्ष्ट्यान्युशति कुरुते
मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभि
र्व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत् ३२ ॥ ॥ ॥ ॥

विशेषतो धृतमणिगणं यर्हि यस्मिन्काले कृष्ण रे रे चोर इत्या क्रुधः सन उशति जल्पति त्वमेव चोर गृहमीत्यादीनि धार्ष्ट्या
नि प्रागल्भ्यानि अथवा उशति भोकमनीये वृथादे यद्वा उशति जल्पति स्तेयोपायैरचितेन गृहेमेहनादीनि पुरीषोत्सर्गादी
नि कुरुते एवं स्तेयोपायैः विरचिता कृतिः कर्म येन सः त्वत्समीपे सुप्रतीकः साधुरिवास्ते सभयेन नयनेन पश्यति तत्र स्तेततो वद्धीत्यु
क्त्वा मुखं च तदालोकिनीभिर्व्याख्यातार्थाप्रख्यापित जन्मफला उपालब्धुं
आदौ मुनैच्छत ३२

भा०द० १
२७

कदाचिदपराधांतरे उपालंभं तत्तद्वात्तु मृद्भक्षणं दर्शयन्नाह एकदेति ३३ उपालभ्य निर्भर्त्स्य संभ्रान्तप्रेक्षणो चपलनेत्रे हितैषिणी अहितैषिणी यस्य ३४ अदान्तात्मन् चपलात्मन् रहः एकान्ते ३५ नाहं भक्षितवानिति तेन द्वियाहं किंचिन्मया भक्षितमत्र मद्वाचैव सर्वं मत्स्तीति भावः समक्षं प्रत्यक्षे ३६ व्यादेहि मुखं प्रसारय तेऽव्याहतैश्वर्यः प्रसारितवान् ३७ तत्र तस्मिन्मुखे विश्वं ददृशे ददर्श तत्प्रपंचपत्ति जगत् जंगमं स्थास्नु स्थावरं खं अंतरिक्षलोकं साद्रिद्वीपाब्धि भूगोलं भूर्लोकं वायुः प्रवहः अग्निर्वैद्युतः इंदुः अत्र तारकाश्च ततस्थिते ३८ ज्योतिश्चक्रं स्वर्लोकं वैकारिकाणि देवाः मन इति वैकारिकस्य इन्द्रियग्रहीतं मनोदेवेभ्यः तराणा

एकदा क्रीडमानास्ते रामाद्या गोपदारकाः। कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ३३ सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी। यशोदा भयसंभ्रान्तप्रेक्षणाक्षमभाषत ३४ कस्मान्मृदमदान्तात्मन् भवान् भक्षितवान् रहः। वदन्ति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययं ३५ नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः। यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ३६ यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान् हरिः। व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ३७ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः। साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकं ३८ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च। वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ३९ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदं। सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां ४०

त्पुनरुक्तं इन्द्रियाणि च तैजसानि मात्राः सामग्राः शब्दादयः ३९ एवमेतद्विचित्रं विश्वं सह एकदेववीक्ष्य विचित्रतामाह जीवः अंशः गुणक्षोभकः कालः परिणामहेतुः स्वभावश्च जन्महेतुः कर्म चैतत्संस्कारः आशयश्च एते लिंगानां चराचरशरीराणां भेदो यस्मिन् तेन तद्वत् सहात्मानं स्वमपि तत्र विदित्वा सूनोस्तनौ अस्ये विदारितास्ये शंकामवाप ४० कृष्ण

कृष्ण
२७

तामाह किं स्वप्न इति परितो विलोक्याह अयं स्वप्नः किं देवस्य हरेर्माया तत्परिच्छेदन्त्येव किं तु परस्य तु ततो हि किं वा मदीय एव कश्चिद् बुद्धिमोहः विपर्ययासः दर्पणादृष्टवत् प्रवर्तते हि अथैव अस्य एव औत्पत्तिक एष मे ततः प्रतीयते अन्तर्बहिर्ज्ञानेन रूपेण अस्य जगत्प्रतीयते तथापि सति विप्रतिपत्तिविषयो हि विपरस्परं वैपरीत्येन प्रतीतिः स्यादित्याशंक्यात्मना वितर्कयति अथो इति ममास्य अर्भकस्य यः कश्चनाचिन्त्य आत्मयोगः स्वीयमैश्वर्यं औत्पत्तिकः स्वाभाविकः ४१ चरमं तं प्रमाणाभावात्प्रणमति अथ इति निश्चित्याह अथो इति चेतः चित्तं वितर्कादि निर्वितर्कगोचरं जगत् यदाश्रयं यदधिष्ठानं येन कारणाधिष्ठात्रा यतो बुद्धेः प्रभ

किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ४१ अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरञ्जसा यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदं ४२ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती गोप्यश्च गोपाः सहगोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ४३ इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ४४ ॥ ॥ ॥ ॥

प्रकाशमानं विदन्नवित्तं अयं न यत्तत्त्वतः तर्कोदकं अतः आह सुदुर्विभाव्यमिति इदमत्यन्तमचिन्त्यमित्यर्थः ४२ एवं प्रपेन चयनाती स्त्रीतत्त्वं पुनर्जीवसंस्थितेहेतुमायाकार्यत्वेनोन्नयेत्याह अहमिति पृथ्वी स्त्री ममासौ अयं मम पतिः अयं व्रजेश्वरस्याखिलवित्तपा अधिष्ठात्री अहं सती तथा एषः प्रसूतो मे सुतः गोप्यादयश्च मदीया इति इत्थं कुमतिर्यन्मायया सा एव मे शरणमिति ४३ ४४ ६१ ६२ ६८ ६६

प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्याः ४४ मायावलोकिकस्मात्त्रय्येति त्रय्यादिरूपेणाप्युपनिषद्भिर्ब्रह्मेति सां
ख्यैः पुरुष इति योगैः परमात्मेति सात्वतैर्भगवानिति उपगीयमानं माहात्म्यं यस्य तं ४५ अतिविस्मयेन पृच्छति नंद इति महोदयं म
हानुदय उद्भवो यस्य तत् ४६ ययोः प्रसन्नोऽपि तीर्थस्य पितरावपि यन्नान्वविंदेतां न प्राप्नुवतां कृष्णस्यार्भकेहितं अर्भकेष्टितं वा

सद्यो नष्टस्मृतिर्गोपी सारोप्यारोहमात्मजं प्रवृद्धस्नेहकलिलहृदयासीद्यथा पुरा ४४ त्रय्या चोपनिषद्भिश्च
सांख्ययोगैश्च सात्वतैः उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं ४५ राजोवाच नंदः किमकरोद्ब्रह्मन् श्रेय
एवं महोदयं यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ४६ पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितं गायंत्यद्या
पि कवयो यल्लोकशमलापहं ४७ श्रीशुक उवाच द्रोणो वसूनां प्रवरो धरया भार्यया सह करिष्यमाण आदेशा
न्ब्रह्मणस्तमुवाच ह ४८ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत
५० अस्त्वित्युक्तः स भगवान्व्रजे द्रोणो महायशाः जज्ञे नंद इति ख्यातो यशोदा सा धराऽभवत् ५१ ततो भक्तिर्भ
गवति पुत्रीभूते जनार्दने दंपत्योर्नितरामासीद्गोपगोपीषु भारत ५२ कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे वि
भुः सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ५३ इति श्रीभागवते महापुराणे दशमस्कंधे विश्वरूपदर्शनं नामाष्ट
मोऽध्यायः ॥ ८ ॥

लीलां यत् कवयो गायंति यच्च लोकानां शमलं पापमपहंति ४७ ब्रह्मणः आदेशान् गोपालनादिलक्षणान् ४८
५० स एव हे कृष्णे यशोदा सैव नंद इति ख्यातः सा च धरा यशोदाऽभवत् ५० गोपगोपीनां भक्तिः स्वभावादस्त्येव भ
क्तिः तयोस्तु नितरामिति ५२ स्वलीलया पुत्रभावानुकारिराजा ५३ दशमेऽष्टमः ॥ कृष्णाय नमः वासुदेवाय नमः ॥

नवसेपयउत्सिक्ते गत्वा गोप्योऽथ तत्क्षणे विलोक्यामीदृशं गादिकं छेदाभावं खलं ननंदराजते विश्वे दृष्ट्वा विस्मितचेत
सः वेधन खंडगुलोपूर्णं पूर्णतामन्वदर्शयत् ७ स्वयं दधि निर्ममंथ तदा ध्यानाय तेति वक्तारात्वयः १ स्त्रीरत्नकोटीयकुरत्नी
राकेशराज्ञ्यो यशोस्तयोर्नृजयोश्चलं तौ वंके रौव ववराहिंगलंत्यौ मालत्यौ यस्याः सा ३ ४ अथ श्रीते कुली सारोपि

शुकउवाच एकदा गृहदासीषु यशोदानंदगेहनी कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि २ यानि यानीह गी
तानि तद्बालचरितानि च दधि निर्मथने काले स्मरंतीतान्यगायत ३ क्षौमं वासः पृथुकटितटे विभ्रती सूत्रनद्धं
पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मा
लती निर्ममंथ ३ तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ४
तमंकमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखं अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि
त्वधिश्रिते ५ संजातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनं भित्वा मृषाश्रुर्दृषदश्मना रहो जघास
हैयंगवमंतरंगतः ६ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं भग्नं विलोक्य स्वसुतस्य
कर्म तज्जहास तं चापि न तत्र पश्यती ७ उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितं हैयंगवे
चौर्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः ८ ६९

तेउत्सिच्यमाने अग्नितापेनोद्रिच्यमाने ५ दृषदश्मना शिलापुत्रेण अंतरंगं गृहमध्यं गतः सन् रहः एकांते नवनीतम
भक्षयत् ६ सुशृतं सुतप्तं दधिमंथपात्रं स्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा ७ उलूखलांघ्रेः परिवर्तितस्योलूखलस्योपरि
शिचि शिक्ये चौर्येण विशंकिते चंचले ईक्षणे यस्य तं ८ कोपापन्नः

तपसा स्वकायेन ईरितं तत्प्रकारत्तां नीतं अस्य वक्षमं योगप्रवेष्टुं योगिनां मनोपि येनायत्तं अथवा अन्वयावस्त्वेवत्वेन तत्वाय म
यतो योगिनां मनोपि यं प्रवेष्टुं न क्षममिति ९ अन्वेच मानाम्यवंकृम मनुगच्छतीं वक्षसोः वक्षःसोः श्रोणयोर्भरे साऽकांतास्ति यांग
नियस्याः सा विस्रंसिता केशा वेध्याम्भतेः प्रसक्तैरनुगतिरनुगमनं यस्याः सा यद्वा जवेन वेपिता केशा वेधात्पुरः पतितानि प्र
सूनानि अनुपश्चाद्गतिर्यस्याः सा पयामशाते ष्टवती १० अजेन्म धिकरणी अजोनी सर्वतः प्रसरंतीम योयोस्ते अंतेणि
स्वपाणिना धेतेसे मर्दयेते निषयेती कस्य कोदरः भीषयेती मयमुत्सारयेती अथागुरते अमासीयते ११ इत्यवदेधारे मे

तामान्नयष्टिं प्रससमीरस मत्वर स्ततो वरुध्याय ससार भीतवत् गोप्यन्नय्याव स्त्वयमाप योगिनां क्षमं
प्रवेष्टुं तपसेरितं मनः ९ अन्वेचमानाजननीरहेषु लेश्रोणीभराश्चीतगतिः सुमध्यमा जवेन विस्रं
सितकेशवेधनच्युतप्रसूनानुगतिः परामसात् १० कृतांगसंतं मरुदेतमुद्धिरणी कुवेतमे अजन्मविरणी स्व
पाणिना उदीक्ष्यमाणो मयविह्वलेक्षणां दृष्टोगतीत्वा मिषयेत्स्वचायुतेरे ११ स्पष्टा यष्टिं स्तुतं भीतं वि
धा यामक वास मभो इयेष वेदिलंतवेष्टुदान्तात दीर्घकोविदा १२ न योत्तले वहिर्यस्य न पूर्व नापियाप
रं पूर्वापरे वहिरंतरो जगतो योजगन्नयः १३ ॥ ॥

तदीर्घकोविदा ततत्समा नायानजिह्वा १२ अकोविदत्वा भेवाह न योत्तरिति येवजिः वेष्ठनं हि वहिः परिस्तेन रहस्तामंत
रा वृत्तस्य भवति तथापूर्वापरविभागतो वस्तुनः पूर्वतो हामष्टत्वा परितः परिवेष्टने नभयंतीन त्वेदं स्तीत्याह न योत्त
रिति किंच व्यापकेन व्याप्यस्य वेष्टो भवति तद्विपरीतमित्याह पूर्वापरमिति किंच तद्व्यतिरिक्तस्य नान्येवेष्टस्या
हे जगन्नय इति १२ ॥ ॥

तं मर्त्यलिंगमधोक्षजं आत्मजं मत्वा बबंधेति १४ द्व्यंगुलोनं द्वाभ्यामंगुलीभ्यामूनं न्यूनमासीत् १५ १६
स्मितं कुर्वतीनां मध्ये स्वयमपि स्मयंती विस्मिताभवत् १७ १८ न वैश्यतांभ्यंगइत्यत्र एवं संदर्शितेति
सेश्वरमिदं विश्वं यस्य वशे यस्य वश्यैन विस्मितथः १९ भगवत्प्रसादमन्योपि भक्ताल्लभेत इदं तावतिचिरमिति

तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजं गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा १४ तद्दाम
बध्यमानस्य स्वार्भकस्य कृतागसः द्व्यंगुलोनमभूत्तेन संदधेन्यच्च गोपिका १५ यदासीत्तदपि न्यू
नं तेनान्यदपि संदधे तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनं १६ एवं स्वगेहदामानि यशोदा संदधत्य
पि गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत् १७ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्र
जः दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने १८ एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता स्वव
शेनापि कृष्णेन यस्येदं सेश्वरं वशे १९ नेमं विरंचो न भवो न श्रीरप्यंगसंश्रया प्रसादं लेभिरे
गोपी यत्तत्प्राप विमुक्तिदात् २० नायं सुखापो भगवान् देहिनां गोपिकासुतः ज्ञानिनां चात्म
भूतानां यथा भक्तिमतामिह २१ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः अद्राक्षीदर्जुनौ
पूर्वं गुह्यकौ धनदात्मजौ २२ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् नलकूवरमणिग्रीव
विति ख्यातौ श्रियान्वितौ २३ इति श्रीभागवते महापुराणे दशमस्कंधे गोपीप्रसादो नाम
॥ नवमोध्यायः ९

विरंचिः पुत्रोपि भवः स्वात्मापि श्रीर्जायापि २० कस्मित्साहनायमिति देहिनो देहाभिमानि
नां तापसादीनां निवृत्ताभिमानानामपीति २१ भक्तैर्यद्वत्प्राप्यमनोचकत्वमोहस्तत्वायमिति
२२ २३ इति दशमे नवमोध्यायः ९

दशमेऽथ तत्पद्भ्यां भंजनं तत्र शापस्य यमलार्जुनौ तत्र साध्वी च देवर्षिप्रसादः स्तुतश्च इतीर्यते यत्तद्विगर्हितं कर्म येन वा देवर्षेर्भ-
गवतो तमस्यापि तमः क्रोधः स तद्वक्तुं कथ्यतामिति १ २ गंगायां तत्र मध्ये कथंभूते अम्भोजानां वनानि तेषां राजयः पं-
क्तयो यस्मिन् तस्मिन् ४ अपश्यत इत्युक्ते क्षीबाणौ मत्तौ समबुध्यत ५ कुत इत्यत आह तं दृष्ट्वेति ६ अनुग्रहार्थाय
अनुग्रहश्च मदनाशः अर्थश्च श्रीकृष्णदर्शनं तदर्थमिदं वक्ष्यमाणं न ह्यन्य इत्यादि ७ जोष्यान् प्रियान् विषयान् जुषतः से

शुक उवाच
राजोवाच कथ्यतां भगवन्नेतत्तयोः शापस्य कारणम् यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः १
रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ कैलासोपवने रम्ये मन्दाकिन्यां मदोत्कटौ २ वारुणीं मदिरां पीत्वा
मदाघूर्णितलोचनौ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ३ अन्तः प्रविश्य गंगायामम्भोजवनराजिनि
चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ४ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव अपश्यन्नारदो दे-
वौ क्षीबाणौ समबुध्यत ५ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः वासांसि पर्यधुः शीघ्रं वि-
वस्त्रौ नैव गुह्यकौ ६ तौ दृष्ट्वा मदिरामत्तौ श्रीमदान्धौ सुरात्मजौ तयोरनुग्रहार्थाय शापं दास्य-
न्निदं जगौ ७ नारद उवाच न ह्यन्यो जुषतो जोष्यान् बुद्धिभ्रंशो रजोगुणः श्रीमदादाभिजात्यादि-
र्यत्र स्त्री द्यूतमासवः ॥८ हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः मन्यमानैरिमं देहमजरामृत्यु न-
श्वरम् ९

दर्शनं तदर्थमिदं वक्ष्यमाणं न ह्यन्य इत्यादि ७ जोष्यान् प्रियान् विषयान् जुषतः सेवमानस्य पुंसः श्रीमदा-
दयः अभिजात्यादिः सत्कुलविद्यादिजनितो मदः अन्यो बुद्धिभ्रंशो रजः कार्यः हास्यहर्षादिरूपो नाति तथा बु-
द्धिभ्रंशकः बुद्धिभ्रंशो यतो तितथा किन्तु श्रीमद एवेति तत्रापत्ये स्त्र्यादि चत्वारः यत्र श्रीमदे ८ यत्र श्रीमदे इमं
नश्वरं देहं अजरामृत्यु अजरममृत्युं यथा तथा मन्यमानैः ९ ॥ ॥ ॥ ॥ ॥

नरदेव भू देवसंज्ञितमपि पश्चात् क्रिमिभस्मविट्संज्ञितं इत्थं भस्मसंज्ञितं श्वादिभक्षितं क्रिमिसंज्ञितं त
त्कृते तदर्थं यो भूतध्रुक् द्रोग्धा यतो भूतद्रोहात् निरयो भवति स किं स्वार्थं वेद न वेदैवेत्यर्थः १० किं
तु पितुः मातुः पितुर्वा माता महस्य पुत्रिकाकरणे ११ अव्यक्तप्रभवाप्ययं अव्यक्तात् प्रभवस्तस्मिन्ने
वाप्ययो यस्य तं आत्मसात् कृत्वा आत्मीयमिति मत्वा असतो मूढान् ऋते १२ एवं श्रीमद हेतुर्वैविध्यं तस्मात्तत्प्र
तीकारं निश्चिनोति परं अञ्जनं दारिद्र्यं एव केवलमिति वा कुत इत्यत आह आत्मौपम्येनेति ततो न दुःख्यती

देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितं भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः १० देहः कि
मन्नदातुः स्वं निषेक्तुर्मातुरेव च मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोपि वा ११ एवं साधारणं देह
मव्यक्तप्रभवाप्ययं को विद्वानात्मसात्कृत्वा हंति जंतूनृते सतः १२ असतः श्रीमदांधस्य दारिद्र्यं प
रमंजनं आत्मौपम्येन भूतानि दरिद्रः परमीक्षते १३ यथा कंटकविद्धांगो जंतोर्नेच्छति तां व्यथां
जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः १४ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह कृच्छ्रं यदृच्छया
प्नोति तद्धि तस्य परं तपः १५ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः इंद्रियाण्यनुशुष्यंति
हिंसापि विनिवर्तते १६ दरिद्रस्यैव युज्यंते साधवः समदर्शिनः सद्भिः क्षिणोति तं तर्षं तत आरा
द्विशुद्ध्यति १७ साधूनां समचित्तानां मुकुंदचरणैषिणां उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदा
श्रयैः १८ तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांधयोः तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः
१९ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ न विवाससमात्मानं विजानीतः सुदुर्मदौ २०

ति भावः १३ सदृष्टांतमाह यथेति मुखदुःखादिलिंगैः सर्वेषां जीवानां सुखदुःखे समे इति ज्ञातवानि
त्यर्थः १४ किंच दारिद्र्यं मोक्षमपि साधयतीत्याह दरिद्र इति श्लोकचतुष्टयेन निरहंस्तंभो निर्गतः अहंका
ररूपः स्तंभो यस्मात् सः १५ १६ युज्यंते स्वत एव संगच्छंते तर्षं तृष्णां १७ ननु साधूनामपि धनिकस्य प्रिया

श्रीकृ
३१
भा॰द॰कृ॰

५२

शापति अतः अर्हत इति अनुग्रह स्मृतिस्यात् तां नैव वयमित्यादिना मत्प्रसादेन स्मृतिः स्यात् २१ स्वर्लोकतां देव
त्वं लब्ध्वा मदनुग्रहाल्लब्धा भक्तिर्याभ्यां तथा भविष्यथ इति २२ किमिति सर्पं कर्तुं अंतमाह देवर्षिरिति यथातथा त त
तः २५ यमयोर्यमलयोः सहजातयोः आत्मनः कृष्णस्य तत्र प्रवेशमात्रेण २६ अन्वञ्चतीति अन्वक्
तत्र हेतुः दामोदरेणेति उत्कलितौ उत्पाटितौ अंघ्रिबंधौ मूलबंधौ ययोस्तौ परमस्य श्रीकृष्णस्य विक्रमि

अतोऽर्हतः स्यात्तवतोस्यातां नैवं यथा पुनः स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् २१ वासुदेव
स्य सान्निध्यं लब्ध्वा दिव्यशरच्छते वृत्ते स्वर्लोकतां भूयो लब्धभक्तौ भविष्यथः २२ श्रीशुक उवाच एव
मुक्त्वा स देवर्षिर्गतो नारायणाश्रमम् नलकूवरमणिग्रीवावासतुर्यमलार्जुनौ २३ ऋषेर्भाग
वतमुख्यस्य सत्यं कर्तुं वचो हरिः जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ २४ देवर्षिर्मे प्रियतमो
यदिमौ धनदात्मजौ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना २५ इत्यंतरेणार्जुनयोः कृष्णस्तु
यमयोर्ययौ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् २६ बालेन निष्कर्षयतान्वगुलूखलं तं
दामोदरेण तरसोत्कलितांघ्रिबंधौ निष्पेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौ
कृतचंडशब्दौ २७ तत्र श्रिया परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः कृष्णं
प्रणम्य शिरसाखिललोकनाथं बद्धांजली विरजसाविदमूचतुः स्म २८ कृष्ण कृष्ण महा
योगिंस्त्वमाद्यः पुरुषः परः व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः २९ ॥ ॥ ०

५

प्रवालविटपायोस्तौ २७ ककुभः प्रति सर्वतः स्फुरंतौ शोभितवर्चः यथादिशः प्रकाशयंताविति कुजयोः वृ
क्षयोः स्थितोऽग्निर्यथा मूर्तिमान् उपेतितथोपेत्य विरजसौ निर्वृतौ २८ गोपालं भगवंतं देवौ किमिति प्रणती
मतः तत्राह कृष्ण कृष्ण महायोगिन् अचिंत्यस्वभावस्त्वं न बालः किंतु परः पुरुषः यतः आद्यः कारणा
त्मतः तत्रापि न निमित्तमात्रं किंतु उपादानमपि तत्त्वमेवेत्याशयेन तु कुचतुः व्यक्ताव्यक्तमिति स्थूलसूक्ष्मं चिदं ते
रूपं विदुः २९

२१

नियंतापि त्वमेवेत्याहतुः त्वमेक इति देहः असवः प्राणाः आत्माऽहंकार इंद्रियाणि चैतेषामीश्वरः ३०
न त्वस्य कालो निमित्तं प्रकृतिरुपादानं प्रकृतेर्जातो महान् विश्वात्मतया परिणतः पुरुषः कर्तापि प्र
तावित्यत्र आहतुः त्वमेव काल इत्यादिना सार्द्धेन यतो भगवानीश्वरो विष्णुरव्ययमतः कालो ना
मतत्वस्थीसा प्रकृतिः शक्तिः पुरुषोंशः अतस्त्वमेव सर्वमित्यर्थः ३१ नन्वहमेव चेत्सर्वं तर्हि अदा
दिज्ञानेन तज्ज्ञानं किं न भवति चेत्तत्रापि प्रत्यक्षविषयत्वात् अत आहतुः गृह्यमाणैरिति दृश्यत्वेन व

त्वमेव सर्वभूतानां देहाऽस्वात्मेंद्रियेश्वरः त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ३० त्वं
महान्प्रकृतिः सूक्ष्मा रजःसत्वतमोमयी त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ३१ गृ
ह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः कोन्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ३२
तस्मै तुभ्यं भगवते वासुदेवाय वेधसे आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ३३ य
स्यावतारा ज्ञायंते शरीरेष्वशरीरिणः तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३४ स भवा
न्सर्वलोकस्य भवाय विभवाय च अवतीर्णोंऽशभागेन सांप्रतं पतिराशिषां ३५ नमः पर
मकल्याण नमः परममंगल वासुदेवाय शांताय यदूनां पतये नमः ३६

र्तमानैर्बुध्यहंकारेंद्रियादिभिर्ग्राह्यस्त्वं न भवसि इति भावः ननु तर्हि जीवो जानातु नेत्याहतुः
कोन्विहेति जीवाः प्रत्युत ते प्रागेव स्वप्रकाशतया सिद्धं त्वां को वा जानाति गुणसंवृतः देहाद्यावृतः ३२
अतो दुर्ज्ञेयत्वात्केवलं प्रणामः ततः तस्मै तुभ्यमिति आत्मनः स्वात्मात् द्योतः प्रकाशो येषां तैर्गुणैः
छन्नो महिमा यस्य अभ्रैरिव रवेर्महिम्ने ३३ अहो ऽहमीश्वर इति कुतो ज्ञातं तत्राहतुः यस्येति ३४ भ
वायोद्भवाय विभवाय आधिगतो भवोपि स्वन्तस्मै

३२
भा०
भा२५
३२

नौ आवां अनुचरः कुवेरो नारदो वा तस्य किंकरौ भगवतस्तस्य दर्शनं ३७ तत्र गततयोरावयोः
पूर्वस्वभावो मा भूत् किंतु वाणी गुणानुकथन इत्यादि नः अस्माकं देहेंद्रियो बुद्धिवचनस्थाने बहु
वचनं श्रवसां संगिनां सर्वेषामपीति ज्ञेयं बहुवचनं तव निवासभूतं यज्जगत्तस्य प्रणामे त्वन्निवा
सभूतमिति वक्तव्याने न जगतः प्रणामेऽपि शिरोऽस्त्वित्यर्थः भवत्तनूनां भवतो मूर्तीनां ३८ संकीर्तित
संस्तुतः याभ्यां गुह्यकाभ्यां ज्ञातं ज्ञातो ममाभिप्रायो नाम [illegible] ऋषिविभ्रंशरूपोऽनुग्रहः कृत इति ४० मत्कृतात्मनां ताद

अनुजानीहि नौ भूमंस्तवानुचरकिंकरौ दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ३७ वाणी गुणा
नुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः स्मृत्यां शिरस्तव निवासजग
त्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भगवत्तनूनां ३८ शुक उवाच इत्थं संकीर्तितस्ताभ्यां भगवा
न् गोकुलेश्वरः दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ३९ भगवानुवाच ज्ञातं मम पुरैवै
तदृषिणा करुणात्मना यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः ४० साधूनां समचित्ता
नां सुतरां मत्कृतात्मनां दर्शनान्नो भवेद्बंधः पुंसोऽक्ष्णोः सवितुर्यथा ४१ तद्गच्छतं मत्प
रमौ नलकूवर सादनं संजातो मयि भावो वामीप्सितः परमोऽभवः ४२ ~~तद्गच्छतं मत्परमौ नलकूव
रसादनं संजातो मयि भावो वाम्~~ शुक उवाच इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः बद्धोलू
खलमामंत्र्य जग्मतुर्दिशमुत्तरां ४३ इति श्रीभागवते महापुराणे दशमस्कंधे द्रुमपातनो
नाम दशमोऽध्यायः ॥

साह साधूनां स्वधर्मे [illegible] समचित्तानां आत्मविदां सुतरां मत्कृतात्मनां मय्यर्पितचित्तानां त
दाहे याति [illegible] तरां [illegible] सवितुर्दर्शनाद्बंधो यथा [illegible] न भवेत् तद्वत् ४१ आध्यात्मादेकस्य
सेवाधनं हे नलकूवर युवां तत्र [illegible] सादनं सदनं [illegible] तत्र मत्परमौ संतौ गच्छतं युवयोरपीप्सि
तो मयि प्रेमा जातः [illegible] न भवो यस्मिन् सः ४२ बद्धोलूखलं उलूखले बद्धं [illegible] ४३ दशमे दशमः

कृ०

एकादशे समागत्य वृन्दावनमध्ये अर्भकैः वत्सान्पालयतानेन हतौ वत्सकासुरौ १ निर्घातो वज्रपात भयेन इति शङ्किताः १
तत्र लक्ष्यं प्रत्यक्षतः पतितौ दृष्टावपि पतनकारणमविज्ञायैव बभ्रमुः २ अत्र संस्कारसादृश्यादि पतितउलूखलमिति अत्र कारणमाह कस्ये
दमिदं कर्म कुतो वा कारणात् अतिआश्चर्यं उत्पात इति कातराः भीताः सन्तो बभ्रमुरित्यर्थः ३ मध्यगतेन एतद्वयोर्मध्यग
तेन न केवलमेव बालकेनापि पुरुषावप्यचक्ष्महि दृष्टवन्तो वयमिति ४ केचन तार्किकाः न जगृहुरेव अन्ये

श्रीशुक उवाच गोपा नन्दादयः श्रुत्वा द्रुमयोः पततो रवं तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशङ्किताः १ भूम्यां निप
तितौ तत्र ददृशुर्यमलार्जुनौ बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणं २ उलूखलं विकर्षन्तं दाम्ना बद्धं च बा
लकं कस्येदं कुत आश्चर्यमुत्पात इति कातराः ३ बाला ऊचुरनेनेति तिर्यग्गतमुलूखलं विकर्षता मध्य
गेन पुरुषावप्यचक्ष्महि ४ न ते तदुक्तं जगृहुर्न घटेतेति तस्य तत् बालस्योत्पाटनं तर्वोः केचित्सन्दिग्धचेत
सः ५ उलूखलं विकर्षन्तं दाम्ना बद्धं स्वमात्मजं विलोक्य नन्दः प्रहसद्वदनो विमुमोच ह ६ गोपीभि
स्तोभितोऽनृत्यद्भगवान्बालवत्क्वचित् उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयन्त्रवत् ७ बिभर्ति क्व
चिदाज्ञप्तः पीठकोन्मानपादुकं बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ८ ॥ ॥ ॥

तु सन्देहं प्रकाशिताव बभूवुरिति ५ भगवान् मायाविमोहितस्य चरितमाह उलूखलमिति ६ स्वांश्चैते मामिति शोक
मानोऽतीव बाल्यमनुकरोतीत्याह तदाह गोपीभिरिति स्तोभितः अतः मोदिना प्रोत्साहितः ७ उद् मानयेत्याज्ञप्तः आनेतुम
समर्थ इव बिभर्ति केवलं पीठादिकं बाहुक्षेपं करतालेन चेत्थं विदांचेति चकारस्यान्वयः ८ ॥ ॥ ॥ ॥

भादर
३३

कौशीति भोः फलानीति श्रुत्वा सत्वरम् अच्युतः फलार्थी धान्यमादाय ययौ सर्वफलप्रदः फलविक्रयिणी
तस्य च्युतधान्यकरद्वयं फलैरपूरयद् रत्नैः फलभाण्डमपूरि तत् ७ ॥ ॥ ॥ ॥

तत्र ये स्थविरा विदेतिये तेषां सर्वव्रजस्य हर्षमुवाहेति ८ ९ रं तु वृन्दावनं गन्तुं मतः कृष्णेन यन्त्रिताः स्वतन्त्राः इव नन्दा
द्या मन्त्रयन् व्रजे कार्यं गोगोकुलस्य हितं कार्यं १० ११ १२ १३ विपदं वीनां पश्यामो पदे विहारस्थानं वियत् ऽपि गतम्

ना२

दर्पायस्त विदेशे लोकज्ञात्मानो यत्तस्य वत्सपतां व्रजस्यौवाह वै हर्षमगवान् वालचेष्टितैः ८ गोपवृद्धा महोत्पा
तान् अनुभूय वृहद्वने नंदादयः समागम्य व्रजे कार्यमन्त्रयन् १० तत्रोपनंदो नाम गोपो ज्ञानवयोधिकः देशका
लार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः ११ उत्पाता बहवोत्रास्मान् गोकुलस्य हितैषिभिः आयान्त्यत्र महोत्पा
ता बालानां नाशहेतवः १२ मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालको ह्यसौ हरेरनुग्रहान्नूनमनश्चो
परिनापतत् १३ चक्रवातेन नीतोयं दैत्येन विपदं वियत् शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः १४
यन्न म्रियेत द्रुमयोरन्तरं प्राप्य बालकः असावन्यतमो वापि तदप्यच्युतरक्षणम् १५ यावदौत्पातिकोऽरिष्टो
व्रजं नाभिभवेदितः तावद्बालानुपादाय यास्यामोऽन्यत्र सानुगाः १६ वनं वृन्दावनं नाम पशव्यं
नवकाननं गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधम् १७ ॥ ॥ ॥ ॥ ॥

विकीर्य्या १८ अत्यन्त मोघा कश्चिद् बालः तत्रापि अच्युतेनैव रक्षा मासीत् १९ अरिष्टः अनर्थः इतः स्थानात् २६
पशव्यं पशुभ्यो हितं नवानि काननानि यस्मिन् तत्रापि विघ्ने ते यस्मिन् गोरु १७

कृष्ण
३३

१८ स्वकाधिपः प्रतिपन्निरस्तिताः व्रजान् शकटव्यूहात् रक्षाः शकटारोपिताः परिष्कराः येस्ते १९ यत्राः कृतप्रयत्राः २०२१न्ते

तत्रत्राद्यैव यास्यामः शकटान्युङ्क्त माचिरं गोधनान्यग्रतो यांतु भवतां यदि रोचते १८
तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः व्रजान्स्वान्स्वान्समायुज्य ययू रूढपरिच्छदाः १९
वृद्धान्बालान्स्त्रियो राजन्सर्वोपकरणानि च अनःस्वारोप्य गोपाला यत्ता आत्तशरासनाः २०
गोधनानि पुरस्कृत्य शृंगाण्यापूर्य सर्वशः तूर्यघोषेण महता ययुः सह पुरोहिताः २१
गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः कृष्णलीला जगुः प्रीता निष्ककंठ्यः सुवाससः २२
तथा यशोदारोहिण्यावेकं शकटमास्थिते रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके २३
वृंदावनं संप्रविश्य सर्वकालसुखावहं तत्र चक्रुर्व्रजावासं शकटैरर्धचंद्रवत् ।। २४
वृंदावनं गोवर्धनं यमुनापुलिनानि च वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप २५

त्नैः कुचगतैः कुंकुमैः कांतिर्यासां ताः नूत्नेषु कुचेषु यत्कुंकुमं तेन कांतिर्यासामिति वा २२ २३ व्रजावासं गोकुलवसतिस्था-
नं २४ २५

स्वकालेन तद्योग्यकालेन २६ कौमारलीलां निरूपयति अविदूर इत्यादिना २६ क्षेपणैः बिल्वमलकादिभिः किंकिणीयुक्तैः पादैः क्षिपतः ताडयतः वत्सपालस्य वत्सपालौ बभूवतुः कृत्रिमवृषभान् कुर्वन्ति तैः सह २७ वृषायमाणौ वृषवदाचरन्तौ नर्दन्तौ तौ तदन्तः शब्दं कुर्वन्तौ युयुधाते इत्यर्थः २८ रुतैः शब्दैः जन्तून् हंसमयूरादीन् २९ ३०

एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः २६ अविदूरे व्रजभुवः सह गोपालदारकैः चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ २७ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् क्वचित्पादैः किंकिणीभिः क्वचित्कृत्रिमगोवृषैः २८ वृषायमाणौ नर्दन्तौ युयुधाते परस्परं अनुकृत्य रुतैर्जन्तूंश्चेरतुः प्राकृतौ यथा २९ कदाचिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ३० तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः दर्शयन्बलदेवाय शनैर्मुग्ध इवासदत् ३१ गृहीत्वापरपादाभ्यां सहलांगूलमच्युतः भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजीवितं स कपित्थैर्महाकायः पात्यमानैः पपात ह ३२ तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति देवाश्च परितुष्टा वै मुमुचुः पुष्पवर्षिणः ३३ तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ सप्रातराशौ गोवत्सांश्चारयन्तौ विचेरतुः ३४ ॥ ॥

मुग्ध इवाजानन्निव आसदत् समीपमागमत् ३१ अपरपादाभ्यां सलांगूलं यथा भवति तथा गृहीत्वा ३२ ३३ सर्वेषां लोकानामेकौ मुख्यौ पालकौ प्रातराशः प्रातर्भोजनं तेन सहितौ ३४

अभ्यासं समीपं ३५ ३६ ३७ रामः आदिर्येषां ते रामः ३८ ३९ तुंडयोः चंच्वोः धीरणावद्ग्रंथि तयाविशेषवत् ४० समीडिरे तु
ष्टुवुः आनकैः शंखैः अनेन अभिसंस्तवैः सह ४१ स्वस्थानमागतं प्राणमिव कृष्णेच ४२ अतिसौंदर्यमीत्या आदृताः प्रेमाग

श्री

स्वं स्वं वत्सकुलं सर्वे पाययिष्यंत एकदा गत्वा जलाशयाभ्यासे पाययित्वा पपुर्जलं ३५ ते तत्र ददृशुर्बा
ला महासत्त्वमवस्थितं तत्रसुर्वज्रनिर्भिन्नं गिरेः शृंगमिव च्युतं ३६ स वै बको नाम महानसुरो बकरूपधृक्
आगत्य सहसा कृष्णं तीक्ष्णतुंडोऽग्रसद्बली ३७ कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः बभूवुरिंद्रियाणी
व विना प्राणं विचेतसः ३८ तं तालुमूलं प्रदहंतमग्निवद्गोपालसूनुं पितरं जगद्गुरोः चच्छर्द सद्योऽतिरुषाऽ
क्षतं बकस्तुंडेन हंतुं पुनरभ्यपद्यत ३९ तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः पश्यत्सु गो
पबालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसां ४० तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिकादि
भिः समीडिरे चानकशंखसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ४१ मुक्तं बकास्यादुपलभ्य बालका रामाद
यः प्राणमिवेंद्रियो गणाः स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ४२ श्रुत्वा तद्विस्मि
ता गोपा गोप्यश्चातिप्रियादृताः प्रेत्यागतमिवौत्सुक्यादैक्षंत तृषितेक्षणाः ४३ अहो बतास्य बालस्य बह
वो मृत्यवोऽभवन् अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयं ४४ ॥ ॥ ॥ ॥ ॥

तमिव लोकोत्तरादागतमिव तृषितान्यतृप्तानि अमृतं पिबंतीव रसयानि येषां तैः ४३ अहो बत अस्यारिष्टानि अत्र य
स्य हेतुर्न दृश्यते तेनान्वयः अपि त्वेवमपि तेषां मेवानिष्टमासीत् यतस्तैः पूर्वमस्माकं भयं कृतम् ४४ कृष्णपनमः

भा०द०

३५

अघघोरदर्शना अपि नाभिभवंति न धर्षयंति ५५ गर्गो यदाहास्मात्त्वं [illegible] तेन नारायणसमो गुणैरित्यादि ५६ विलसत्पृथग्
तं हत्वा वत्सं दंभासुरं हरिः मुनिपृथग्गतं [illegible] १ इति द्वादशे [illegible] द्वादशे तु महासर्पवपुष्कमघासुरं
वत्सपालैः [illegible] हंतीति वर्ण्यते [illegible] इति अघासुरमुखस्य सर्वः प्राविशद्धरिः २

अथाप्यभिभवंत्येनं नैव ते घोरदर्शनाः जिघांसयैनमासाद्य नश्यंत्यग्नौ पतंगवत् ५५ अहो ब्रह्म
विदां वाचो नासत्याः संति कर्हिचित् गर्गो यदाह भगवानन्वभावि तथैव तत् ५६ इति नंदादयो
गोपाः कृष्णरामकथां मुदा कुर्वंतो रममाणाश्च नाविंदन्भववेदनां ५७ एवं विहारैः कौमारैः कौमा
रं जहतुर्व्रजे निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ५८ इति श्रीभागवते महापुराणे दशम
स्कंधे वत्सबकवधो नामैकादशोऽध्यायः ११ श्रीशुक उवाच क्वचिद्वनाशाय मनो दधद्व्रजात्प्रातः स
मुत्थाय वयस्यवत्सपान् प्रबोधयन् शृंगरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः १ तेनैव सा
कं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः स्वान्स्वान्सहस्रोपरिसंख्ययान्वितान्वत्सा
न्पुरस्कृत्य विनिर्ययुर्मुदा २ कृष्णवत्सैरसंख्यातैर्यूथीकृत्य स्ववत्सकान् चारयंतोऽर्भलीला
भिर्विजह्रुस्तत्र तत्र ह ३ फलप्रबालस्तवकसुमनःपिच्छधातुभिः काचगुंजामणिस्वर्णभूषिता
अप्यभूषयन् ४ ॥ ॥

धायित्वं दधत् वनाशाय वनस्य प्रथमं भोजनं कर्तुं १ तेनैव संगस्येन श्रीकृष्णेन वा पृथुकाः बालकाः स्निग्धाः [illegible] शि
कृ [illegible] २ ३ [illegible] पूर्वं मातृभिर्भूषिता अपि [illegible]
[illegible] ४ कृष्णायनम

कृष्ण

३५

दि

मुह्यन्त क्रोशयन्तः ५ यदि दूरं गतः क्षोभो भवति न हीति ६ ध्मान्तः वादयन्तः गोभिः सह ७ विच्छायाभिः पाण्डुच्छायाभिः ८ कीशवालान् रक्ष
शाखासु लंबमानान् लिखान रलोम्लोतिःप्राप्यन्तः लोमूलमम्भुर्वाताः सहेतुमानाद न्तः विकुर्वतः ९ तदर्शनं मुधि रमादिमितैः सा वि
